कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्रीरा

राजय

।।सहस्रनामभाष्यंलिख्यते।।

Acc. NO. ~~2422~~ M·1553
Title - विष्णुसहस्रनामभाष्य.
Author - शङ्कराचार्य.
Date - शके 1748

Subject - वेदान्त.
folio - 71
Xerox - 139

KKSU LIBRARY
RAMTEK
441 106
M·1553
Dist Nagpur

Checked 2012

नं१२२

१

विष्णोःसहस्रनामभाष्यंशंकरा
चार्यकृतप्रारंभः॥

१

Title - विष्णुसहस्रनामभाष्य
Author - शंकराचार्य.
Date - शके 1748

१

श्रीगणेशाय नमः ॥ हरिः ॐ ॥ सच्चिदानंदरूपाय कृष्णाया
क्लिष्टकारिणे ॥ नमो वेदांतवेद्याय गुरवे बुद्धिसाक्षिणे ॥१॥ कृ
ष्णद्वैपायनं व्यासं सर्वलोकहिते रतं ॥ वेदाब्जभास्करं वंदे शमा
दिनिलयं मुनिं ॥२॥ सहस्रमूर्तेः पुरुषोत्तमस्य सहस्रनेत्रान
नपादबाहोः ॥ सहस्रनाम्नां स्तवनं प्रशस्तं निरूप्यते जन्मज
रादिशांतये ॥३॥ श्रीवैशंपायनो जनमेजयमुवाच श्रुत्वेति ॥ १
श्रीवैशंपायन उवाच ॥ श्रुत्वा धर्मानशेषेण पावनानि च सर्व
शः ॥ युधिष्ठिरः शांतनवं पुनरेवाभ्यभाषत ॥१॥ धर्मानभ्यु
दयनिःश्रेयसोपसक्तिहेतुभूतान् वेदलक्षणानशेषेण कार्त्स्न्येन
पावनानि पापक्षयकराणि च सर्वशः सर्वप्रकारैः श्रुत्वा
युधिष्ठिरो धर्मपुत्रः शांतनवं शांतनुसुतं भीष्मं सकल
पुरुषार्थसाधनमल्पप्रयासमनल्पफलमनुक्तमिति
कृत्वा पुनरेवाभ्यभाषत प्रश्नं कृतवान् ॥ युधिष्ठिर उ

॥ वि भा

किमेकं दैवतं लोके किं वाप्येकं परायणं || स्तुवंतः कं कमर्चं-
तः प्राप्नुयुर्मानवाः शुभं ||२|| किमेकं दैवतं देवः इत्यर्थः | स्वार्थे
तद्धितविधानात् || लोके आलोकने हेतुभूते समस्तविद्यास्था-
ने उक्तं || किं वाप्येकं परायणं || परमयनं आश्रयं परायणं
तस्मिंल्लोके एकं परायणं चेत् किं || यदाश्रया प्रवर्तंते स-
र्वे यस्मिन्निरीक्षिते || भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंश-
याः || क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे || यस्य
विज्ञानमात्रेणानंदलक्षणो मोक्षः प्राप्यते || यद्विद्वान्न
बिभेति कुतश्चन || यत्प्रविष्टस्य न विद्यते पुनर्भवः ||
यस्य च वेदनात्ते देवभवति || यद्विहता यावरः पश्चान्न
णां नाशो तद्दुःखमेकं परायणं || लोके तस्मिन्निति द्विती-
यः प्रश्नः || कं कं तमेकं देवं स्तुवंतः गुणकीर्तनं कुर्वंतः ||
कमर्चंतः बाह्यमभ्यंतरं चार्चनं बहुविधं कुर्वंतो मानवाः ||

भो
तेर

मनुसुताः ॥२३॥ कल्याणं स्वर्गादिफलमाप्नुयुर्लभेयुरिति पुनः प्रश्ने
यः ॥२४॥ को धर्मः सर्वधर्माणां भवतः परमो मतः ॥ किं जपन्मुच्यते जंतु
र्जन्मसंसारबंधनात् ॥२५॥ को धर्मः पूर्वोक्तलक्षणः सर्वेषां धर्मा
णां मध्ये भवतः परमः प्रकृष्टो मतोऽभिप्रेत इति पंचमप्रश्नः ॥ किं ज
प्यं जपन्नुच्चोपांशुमानसलक्षणं जपं कुर्वन् जंतुर्जननधर्मा ॥ अनेन
जंतुशब्देन अर्चनस्तवनादिषु यथायोग्यं सर्वप्राणिनामधिकार
सूचयति ॥ जन्मसंसारबंधात् ॥ जन्मास्तानविद्रभितानामविद्या
कार्याणां गुणलक्षणां ॥ संसारोऽविद्यातत्कार्यबंधनं तस्मान्मुच्य
ते मुक्तो भवतीति षष्ठः प्रश्नः ॥ जन्मसंसारबंधनादितीदमुपल
क्षणमितरेषां फलानामप्येतद्ग्रहणं ॥ मोक्षस्य प्राधान्यख्याप
नार्थं ॥ भीष्म उत्तरमुवाच ॥ सर्वेषां बांधवानां नयहेतुर्भीष्मः ॥
मोक्षधर्मादीनां प्रवक्ता सर्वज्ञः ॥ भीष्म उवाच ॥ जगत्प्रभुं देवदे
वमनंतं पुरुषोत्तमं ॥ स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥
ष्वा ॥ जगत्प्रभुमिति ॥ षट्प्रश्नोत्तराः ते त्रयपश्यो सोनततरो जप्यति

क्षेपस्य प्रश्नः तेन परिह्रियते जगत्स्थावरजंगमात्मकं तस्य प्रभुं स्वामिनं॥
देवदेवं दृपानां देवं अनंतं देशतः कालतो वस्तुतश्चापरिच्छिन्नं पुरुषोत्त
मंक्षराक्षराभ्यां कार्यकारणाभ्यामुत्कृष्टं नामसहस्रेण नाम्नां सहस्रे
ण स्तुवन् गुणानुसंकीर्तयन् सततोत्थितो निरंतरमुद्युक्तः पुरुषः पू
र्णत्वात्पुरिशयनाद्वा॥ सर्वदुःखातिगो भवेदिति सर्वत्र संबध्यते॥
उत्तरेण श्लोकेन चतुर्थः प्रश्नः॥ समाधीयते॥४॥ तमेव चार्चयन्
नित्यं भक्त्या पुरुषमव्ययं॥ ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव
च॥५॥ तमेव चार्चयन् बाह्यमर्चनं कुर्वन् नित्यं सर्वेषु कालेषु भक्ति
मंजनेनाऽपयेन या पुरुषमव्ययं विनाशोऽलिपारहितं॥ ध्यायन् अ
न्तरार्चनं कुर्वन् स्तुवन् पूर्वोक्तेन नमस्यन् नमस्कारं कुर्वन् पूजा
योग्यं तमुभयस्तुतिनमस्कारलक्षणा यजमानः पूजकः फले
भोक्ता॥ अथवा अर्चयन्निति तेनोभयविधमर्चनमुच्यते॥ ध्या
यन् स्तुवन् नमस्यन्निति मानसं वाचिकं कायिकं चोच्यते॥ त
तो पप्रं परिकरस्तूत्तरैस्त्रिभिः पदैः॥६॥ अनादिनिधनं वि
ष्णुं सर्वलोकमहेश्वरं॥ लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भ

श१

वेत॥६॥ अनादिनिधनं षड्भावविकारवर्जितं॥ विष्णुं व्यापनशी
लं॥ सर्वस्य लोकस्य तदिति लोको दृश्यवर्गः तस्य नियंतॄणां ब्रह्मा
दीनामपि ईश्वरत्वात् सर्वलोकमहेश्वरस्तं लोकं दृश्यवर्गस्यात्मा
विवेकेन बोधेन साक्षात् पश्यतीति लोकाध्यक्षः तं नित्यं निरंतरं स्तु
वन् सर्वदुःखाति गो भवेदिति त्रयाणां साधारणं फलवचनं॥
सर्वाण्यध्यात्मिकादिदुःखान्यतीत्य गच्छतीति सर्वदुःखातिगो
भवेत् स्यात् मुक्तमेव स्तूयं विधिर्नष्टि॥६॥ ब्रह्मण्यं सर्वधर्मज्ञं
लोकानां कीर्तिवर्धनं॥ लोकनाथं महद्भूतं सर्वभूतभवोद्भवं॥७॥
ब्रह्मण्यं ब्रह्मणे स्वस्मै ब्राह्मणाय तपसे श्रुतये हितं॥ सर्वान् धर्मान्
जानातीति सर्वधर्मज्ञः तं लोकानां प्राणिनां कीर्तिं यशांसि स्वशक्त्य
नुप्रवेशेन वर्धयतीति तं॥ लोकैर्नाथ्यते याच्यते लोकानुपतापय
तु यः शास्ते लोकानामिष्टे इति वा लोकनाथः॥ महद्भूतं स्वविश्वोत्क
र्षेण वर्तमानत्वात्॥ भूतं परमार्थसत्यं॥ सर्वभूतानां भवः संसारो

यत्सकाशादुद्भवतीति सर्वं भूतभवोद्भवः तं पंचमप्रश्नं समाधत्ते ॥७॥
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ॥ यद्भक्त्या पुंडरीकाक्षं स्त
वैरर्चेन्नरः सदा ॥८॥ सर्वेषां वेदलक्षणानां धर्माणां मेषं वक्ष्य
माणो धर्मोऽधिकतम इति मे मम मतोऽभिप्रेतः ॥ यद्भक्त्या तात्पर्ये
ण पुंडरीकाक्षं हृदयपुंडरीके प्रकाशमानं वासुदेवं ॥ स्तवैर्गुण
संकीर्तनलक्षणैः स्तुतिभिः ॥ सर्वदार्चेत् सत्कारपूर्वकमर्चे
न कुर्यात् ॥ नरो मनुष्य इति यत् ॥ अस्य स्तुतिलक्षणस्यार्चे
नस्याधिक्ये किं कारणं उच्यते ॥ हिंसादिपुरुषांतरद्रव्यदेशका
लादिनियमानपेक्षत्वात् आधिक्ये कारणं ॥ ध्यायन्कृते यजन्य
ज्ञैस्त्रेतायां द्वापरेऽर्चयन् ॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य के
शवं ॥ इति श्रीविष्णुपुराणवचनात् ॥ जपेनैव तु संसिद्ध्येद् ब्रा
ह्मणो नात्र संशयः ॥ कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्य

४

तइतिमानववचनात्॥जपस्तुसर्वधर्मेभ्योपरमोधर्मउच्यते॥
अहिंसयाचभूतानांजपयज्ञःप्रवर्त्ततइतिमहाभारते॥यज्ञा
नांजपयज्ञोस्मीतिभगवद्वचनात्॥१०॥नतुसर्वेमग्निमसयेषमेसर्व
धर्माणांधर्मोधिकतमोमतइत्युक्तेर्द्वितीयप्रश्नसमाधानं।
१८॥परमंयोमहत्तेजःपरमंयोमहत्तपः॥परमंयोमहद्ब्रह्मपर
मंयःपरायणं॥१९॥परमंप्रकृष्टंमहद्बृहत्तेजश्चैतन्यलक्षणं
सर्वावभासकं॥येनसूर्यस्तपतितेजसेद्धः॥तदेवज्योतिषां
ज्योतिः॥नतत्रसूर्योभातिनचंद्रतारकमित्यादिश्रुतेः॥य
दादित्यगतंतेजइत्यादिस्मृतेश्च॥परमंतपसांतापयतीतितपः
परमंचलोकंपरमंचलोकंसर्वाणिचभूतानियोंतरोयमयतीति
अंतर्यामिब्राह्मणोक्तसर्वनियंतृत्वश्रवणात्॥भीषास्माद्वातःपवतेइत्या
दिवचनेभ्योलोकानांप्रतीपइतिवातपः॥अऐश्वर्यमनवच्छिन्नमि
तिमहत्तस्य॥एवसर्वेश्वरइतिश्रुतेः॥परमंसत्यज्ञानलक्षणंब्रह्म॥

४

९

इत्याशयामहत्वं परमं प्रकृष्टं परायणं पुनरावृत्तिशंकावर्जितं ॥ परम
महणा सर्वत्र परं तेज आधिक्यं व्यावर्त्तते ॥ सर्वत्र यो देव इति विशे
ष्यते ॥ यो देवः परमं तेजः परमं तपः परमं ब्रह्म परमं परायणं ॥
स एकः सर्वभूतानां परायणमिति वाक्यार्थः ॥ प्रथमस्य प्रश्न
स्योत्तरमाह ॥ ९ ॥ पवित्राणां पवित्रं यो मंगलानां च मंगलं ॥
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥ १० ॥ पवित्राणां पाव
नानां तीर्थादीनां ॥ परस्त्वपुमानुध्यातो दृष्टः कीर्तितश्च स्तुतः
संपूजितः स्मृतः प्रणतः पापघ्नः सर्वानुन्मूलयतीति परमं प
वित्रं संसारबंधनहेतुभूतं पुण्यापुण्यात्मकं कर्म तत्कारणं
चाज्ञानं सर्वं नाशयनूस्वयाथात्म्यज्ञानेनेति यावत् पवित्राणां पवि
त्रं ॥ रूपमारोग्यमर्थांश्च भोगांश्चैवानुषंगिकान् ॥ ददाति ध्या
यतो नित्यमपवर्गप्रदो हरिः ॥ ९ ॥ चिद्रूपमानः समस्तानां कुशा
लानां निदो हरिः ॥ समस्तस्यासिल्लैश्चान्यलोच्यतः किंनचि

10

सते॥२॥ध्यायन्नारायणंदेवंस्नानादिषुचकर्मसु॥प्रायश्चित्तं
हिसर्वस्यदुष्कृतस्येतिवैश्रुतिः॥३॥अतिपातकयुक्तोपिध्यायं
न्निमिषमच्युतं॥भूयस्तपस्वीभवतिपंक्तिपावनपावनः॥४॥
आलोड्यसर्वशास्त्राणिविचार्यचपुनःपुनः॥इदमेकंसुनिष्प
न्नंध्येयोनारायणःसदा॥५॥हरिरेकःसदाध्येयोभवद्भिःसत्व
संस्थितैः॥ओमित्येवंसदाविप्राःपठतध्यातकेशवं॥६॥भि
द्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः॥क्षीयंतेचास्यकर्मा
णितस्मिन्दृष्टेपरावरे॥७॥यन्नामकीर्त्तनंभक्त्याविलापन
मनुत्तमं॥मैत्रेयाशेषपापानांधातूनामिवपावकः॥८॥अवशे
नापियन्नाम्निकीर्तितेसर्वपातकैः॥पुमान्विमुच्यतेसद्यःसिंह
त्रस्तैर्मृगैरिव॥९॥ध्यायन्कृतेयजन्यज्ञैस्त्रेतायांद्वापरेर्चय
न्॥यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेशवं॥१०॥हरिर्हरति
पापानिदुष्टचित्तैरपिस्मृतः॥अनिच्छयापिसंस्पृष्टोदहत्येव
हिपावकः॥११॥ज्ञानतोज्ञानतोवापिवासुदेवस्यकीर्तनात्॥

५

11

त सर्वे विलयं यान्ति तोयस्थं लवणं यथा ॥१२॥ यस्मिन्न्यस्तम
नो [illegible] र्न याति नरकं स्वर्गोपि यच्चिन्तने विघ्नो यत्र निवेशितात्मम
नसो ब्राह्मोपि लोकोल्पकः ॥ मुक्तिं चेतसि यः स्थितोमलधियां
पुंसां ददात्यव्ययः किं चित्रं तदघं प्रयाति विलयं यत्राच्युते कीर्ति
ते ॥१३॥ शमायालं जलं वह्नेस्तमसो भास्करोदयः ॥ शान्तिः कले
रघौघस्य नामसंकीर्तनं हरेः ॥१४॥ हरेर्नामैव नामैव नामैव
मम जीवनं ॥ कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥१५॥
स्तुत्वा विष्णुं वासुदेवं विपापो जायते नरः ॥ विष्णोः संपूजनान्नि
त्यं सर्वपापं प्रणश्यति ॥१६॥ सर्वदा सर्वकार्येषु नास्ति तेषाम
मंगलं ॥ येषां हृदिस्थो भगवान्मंगलायतनो हरिः ॥१७॥ गं
गास्नानसहस्रेषु पुष्करस्नानकोटिषु । यत्पापं विलयं याति
स्मृते नश्यति तद्धरौ ॥१८॥ प्रायश्चित्तान्यशेषाणि तपःकर्मात्मि
कानि वै ॥ यानि तेषामशेषाणां कृष्णानुस्मरणं परं ॥१९॥ कलि
कल्मषमत्युग्रं नरकार्तिप्रदं नृणां ॥ प्रयाति विलयं सद्यः सकृ
द्यत्रानुसंस्मृते ॥२०॥ सकृत्स्मृतोपि गोविन्दो नृणां जन्मशतैः कृ

12

६

तं ॥ पापराशिं दहत्याशु तूलराशिमिवानलः ॥२१॥ यथाग्निरु
द्धतशिखः कक्षं दहति सानिलः ॥ तथा चित्तस्थितो विष्णुर्योगि
नां सर्वकिल्बिषं ॥२२॥ ईश्वरो देवी प्रसादं मुक्तिकरणे ॥ याव
ज्जीवं प्रणवमथवा वर्णये[illegible]द्रो द्रिपुवा याजुर्वेच वसतिमथवा
वारणस्याविदुध्यातं ॥ हित्वा लज्जां कलिमलकलुषच्छेदना
नीरयेद्वा विष्णोर्नामान्यविश्रममथवा मुक्तिरेवाचेतं ॥२३॥
जनार्दनं भूतपतिं जगद्गुरुं स्मरन्मनुष्यः सततं महामुने ॥ दुःखा
नि सर्वाण्यपहति साधयत्यशेषकार्याणि च यान्यभिप्सते
॥२४॥ कलौ वेत्रापि दोषाढ्ये विषयासक्तमानसः ॥ कृत्वा
पि सकलं पापं गोविंदं संस्मरद्धरिं ॥२५॥ वासुदेवे मनोय
स्य जपहोमार्चनादिषु ॥ तस्यांतरायो मैत्रेय देवेंद्रत्वादिकं
फलं ॥२६॥ लोकत्रयाधिपतिमप्रतिमप्रभावमीषत्प्रणम्य
शिरसा प्रभविष्णुमीशं ॥ जन्मांतरप्रलयकल्पसहस्रजातं
माशुप्रशाममुपयाति नरस्य पापं ॥२७॥ एकोपि कृष्णस्य
कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ॥ दशाश्वमेधी पुन

६

43

रेति मन्त्ररूपं प्रणामी नपुनर्भवाय ॥२८॥ अतसिपुष्पसंकाशं
पीतवाससमच्युतं ॥ येन नमस्यति गोविंदं ने तेषा विघ्न ने भूयं ॥२९॥
विष्णोर्नामैव पुंसः शमलमपहरत्पुण्यमुत्पादयच्च ब्रह्मादिस्था
न भोगे विरतिमथ गुरोः श्रीपदद्वंद्व भक्तिः ॥ तत्वज्ञानं च विष्णोरिह
मृतिजननं भ्रान्तिबीजं च दग्ध्वा संपूर्णानंदबोधो महसि च पुरु
षं स्थापयित्वा निवृत्तो ॥३०॥ इति विष्णुधर्मोत्तरे ॥ शौनकेनापि न
मस्कारः प्रयुक्तः श्रेयःप्राप्तये ॥ संसारस्खलबंधानामुच्छेदे न करो
हि सहस्रादि श्रुति स्मृतीतिहासपुराणवचनेभ्यः मंगलस
स्य स्वयत्नसाधनं तत्र ग्रंथप्रकृच तेषामपि परमनंदलक्षणं परमं मंगलं
मिति मंगलानां च मंगलं ॥ दैवतं देवतानां च देवानां देवः ॥ द्योतनादि
भिः समुत्कर्षेण वर्तमानत्वात् भूतानां योव्ययः व्ययरहितः ॥
पिता जनकः पोषकः स एकः दैवतं लोके इति वाक्यार्थः ॥ एको दे
वः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा ॥ कर्माध्यक्षः
सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥ ॥

स्व्यापनी श्रुतिः ॥ ९ तद्रू किंच न भ्रमनु वदत्तद्वेषज्ञमिति मनुना चोक्तं
पा१ ॥ सर्वभूतस्थमात्मानं सर्वभूतानिं त्मनि ॥ संपश्यन्नात्मयाजी वैस्वा
राज्यमधिगछती ति ॥ सृष्टिस्थित्यंतकारिणी ब्रह्मविष्णुशिवा
त्मिकाः ॥ स संज्ञा याति भगवानेक एव जनार्दनः ॥ तस्मान्न विज्ञा
नमृतेस्ति किंचित्क्वचित्कदाचिद्द्विज वस्तुजातं ॥ विज्ञानमेकं ज१
निजकर्मभेदाद्विभिंनधीत्लैर्बहुधाभ्युपेतं ॥ ज्ञानं विशुद्धं विमलं शु६
विशोकमशेषलोभादिनिरस्तसंगं ॥ ९ एकं सदेकं परमं परेशं
स वासुदेवो न यतोस्ति किंचित् ॥ यदा समस्तदेहेषु पुमानेको व्य
वस्थितः ॥ तदा हि को भवान्कोहमित्येतद्विफलं वचः ॥ सितनीला
दिभेदेन यथैकं दृश्यते नभः ॥ भ्रांतिदृष्टिभिरात्मापि तथैकः स
न्पृथक्पृथक् ॥ २२ समस्तं यदिहास्ति किंचित्तदच्युतो नास्ति प
रं ततोन्यत् ॥ सोहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमो ८
हं ॥ इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः ॥

15

धा यः करोति ॥ तमात्मस्थं येनुपश्यंति धीरास्तेषां सोख्यं शाश्वतं
नेतरेषां ॥ नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधा
ति कामान् ॥ तमात्मस्थं येनुपश्यंति धीरास्तेषां शांतिः शाश्वती
नेतरेषां ॥ इति काठके ॥ ब्रह्म वा इदमग्र आसीदेकमेव नान्यद
तो दृष्टस्यादि बृहदारण्यके ॥ अनेजदेकं मनसो जवीयः तत्र को
मोहः कः शोक एकत्वमनुपश्यत इति ईशावास्ये ॥ आत्मा वा इदमे
क एवाग्र आसीन्नान्यत्किंचन ॥ सर्वेषां भूतानामंतरः पुरुषः
स म आत्मेति विद्यात् ॥ एकं सद्विप्रा बहुधा वदंति ॥ एकं संतं ब
हुधा वदंति ॥ एकं संतं बहुधा कल्पयंति ॥ धावा भूमी जनयन्देव ए
कः ॥ [illegible] धारयन्नेनां निविविधे [illegible] वेदे ॥ सर्वभूतस्थितं यो मा
भजत्येकत्वमास्थितः ॥ [illegible] यसपन्ने ॥ अहमात्मा गुडा
केश सर्वभूताशयस्थितः ॥ यदा भूतपृथग्भावमेकस्थमनु
पश्यति ॥ यथा प्रकाशयत्येकः ॥ सर्वधर्मान्परित्यज्य मामेकं
शरणं व्रजेत्येवमादिगीतोपनिषत्सु ॥ भगवति चैवं तात्पर्य
मतो ॥

ति

योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै॥तमे
वदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्येइति
श्वेताश्वतराणांमंत्रोपनिषदिति॥सएवदेवतेक्षत॥एक
मेवाद्वितीयमितिछांदोग्ये॥हिरण्यगर्भेइसष्टौमंत्रः कु
स्मैदेवायेइसत्रएकारलोपेनेकदेवताप्रतिपादकास्तेतोपि
पकं॥अग्निर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोब
भूव॥एकस्तथासर्वभूतांतरात्मारूपंरूपंप्रतिरूपोबहि
श्च॥वायुर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबभूव
॥एकस्तथासर्वभूतांतरात्मारूपंरूपंप्रतिरूपोबहि
श्च॥सूर्योयथासर्वलोकस्यचक्षुर्नलिप्यतेचाक्षुषैर्बा
ह्यदोषैः॥एकस्तथासर्वभूतांतरात्मानलिप्यतेलोक ॥७॥
दुःखेनबाह्यः॥एकोक्षरःसर्वभूतांतरात्माएकंरूपं

यमेनोक्तं ॥ सकलमिदमहं च वासुदेवः परमपुमान्परमेश्वरः
स एकः ॥ इति मतिरचला भवत्वनंते हृदयगते व्रज तान्विहा
य दूरात् ॥ यथाह वसुधा सर्वं सत्यमेतद्दिवौकसः ॥ अहंभवोभ
वेतश्च सर्वनारायणात्मकं ॥ विकल्पयस्तु पास्तस्य तासीमेवपर
सारं ॥ आधिक्यन्यूनताबाध्यबाधकत्वेन वर्त्तते ॥ अयानलं
य विश्वात्मन् लोकमेव हि कारणं ॥ जगतोस्य जगत्सर्वे मे देवो
वोप्यवस्थितो ॥ त्वयापदत्तयेदत्तं तद्दत्तं ममयं मया ॥ मत्तो विभिन्न
नमात्मानं द्रष्टुं महसि शंकर ॥ योहं स त्वं जगच्चेदं सदेवासुरमा
नुषं ॥ अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः इति विष्णुपुरा
णे ॥ विष्णोरन्यं तु पश्यंति ये मां ब्रह्माणमेव च ॥ कुतर्कमतयो
मूढाः पच्यंते नरकेष्वधः ॥ ये च मूढा दुरात्मानो भिन्नं पश्य
न्ति मां हरिं ॥ ब्रह्माणं च तथा तेषां ब्रह्महत्यासमं त्वघमिति भ
विष्यपुराणे महेश्वरवचनं ॥ तथा च हरिवंशे कैलासयात्रायां ॥

१

महेश्वरवचनं ॥ आदिस्त्वं सर्वभावानां मध्यमंतस्तथा भवान् ॥ त्वत्तः सर्वमभूद्विश्वं त्वयि सर्वं प्रलीयते ॥ अहं त्वं सर्वगो देव त्वमेवाहं जनार्दन ॥ आवयोरंतरं नास्ति शब्दैरर्थैर्जगत्त्रये ॥ नामानि तव गोविंद यानि लोके महांति च ॥ तान्येव मम नामानि नात्र कार्या विचारणा ॥ त्वदुपासा जगन्नाथ सैवास्तु मम गोपते ॥ यश्च त्वां द्विषते गोप स मां द्वेष्टि न संशयः ॥ त्वद्विस्तारो यतो देव अहं भूतपतिस्ततः ॥ न तदस्ति विभो देव यत्ते विरहितं क्वचित् ॥ यदासीद्वर्तते यच्च यश्च भाविजगत्पते ॥ सर्वं त्वं देवदेवेश विना किंचित्त्वया नहि ॥ इत्यादिवाक्यान्येव त्वत्प्रतिपादकानि ॥ १० ॥ यदेकं तद्दैवतं तस्योपलक्षणमुच्यते ॥ यतः सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये ॥ ११ ॥ यतो युस्मात्सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च

१

प्रलयं विलयं यांति पुनर्भूयएवेत्यवधारणार्थः॥ नान्यस्मिन्नि
त्यर्थः॥ युगक्षये महाप्रलये॥ चकारात्मध्येपि यस्मिंस्तिष्ठंति॥
यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यपि
भिसंविशंतीति श्रुतेः॥ तस्य लोकप्रधानस्य जगन्नाथस्य
भूपते॥ विष्णोर्नामसहस्रं मे शृणु पापभयापहं॥१२॥ तस्यैवं
लक्षितस्यैकदेवतस्य लोकप्रधानस्य लोकहेतुभिः प्रतिपादि
तस्य जगन्नाथस्य भूपते र्विष्णोर्व्यापनशीलस्य नाम्नां सहस्रं
पापभयं चापहंतीति पापभयापहं मे मत्तः शृणु एकाग्रमनाः
भूत्वावधारय॥ एकस्यैव समस्तस्य ब्रह्मणोऽपि [illegible] जसत्तम॥
नाम्नां बहुत्वं लोकानामुपकारकरं शृणु॥ निमित्तशब्दरूपो
नाम्नां भेदिन्यस्तदुदीरणात्॥ विभिन्नान्येव साध्यंते फलानि
द्विजसत्तम॥ यद्धरिमन्नाम यस्य तत्तस्मिन्नेव वस्तुनि॥
साधकं पुरुषव्याघ्र सौम्यक्रूरेषु वस्तूष्विति विष्णुधर्मवचनं॥

१०

यद्यपि परस्य ब्रह्मणः गुणक्रियाजातिरूढीनां शब्दप्रवृत्तिहेतू-
नानिमित्तता स्योद्दीनां चासंभवस्तथापि सगुणे ब्रह्मणि सविका-
रे च सर्वासां तासां शब्दप्रवृत्तिहेतूनां संभवात्सर्वे शब्दाः अप-
रस्मिन्नपुंसि वर्त्तते ॥१२॥ यानि नामानि गौणानि विख्यातानि म-
हात्मनः ॥ ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥१३॥
तत्र यानि नामानि गौणानिगुणयोगात्प्रवृत्तानि तेषु यानि प्रसिद्धा-
नि ॥ ऋषिभिर्मंत्रद्रष्टृभिश्च परिगीतानि महात्मनः सावात्मीबेति ॥
यश्चाप्रोक्तियदाद्दत्तो यच्चात्ति विषयानीत ॥ यच्चास्य संततो भा-
वस्तस्मादात्मेति कीर्त्यते ॥ इति वचनोदयमेवमहात्मेति म-
हात्मा ॥ तस्याचिंत्यप्रभावस्य तानि वक्ष्यामि भूतये ॥ पुरु-
षार्थचतुष्टयसिद्ध्ये पुरुषार्थचतुष्टयार्थिनामिति ॥ अर्थ
नामसत त्सय आदित्यादिशब्दानामर्थानंतरप्रसिद्धेनोआदि

१०

21

रिति।

साधर्म्याणां तद्विभूतित्वेन तदभेदात् तस्यैव स्तुतिं प्रसिद्धार्थे
ग्रहणेपि स्तुतित्वं॥ भूतात्मा चेंद्रियात्मा च तत्त्वात्मा सर्वतो भवान्
आत्मा च परमात्मा च त्वमेकः पंचधा स्थित इति॥ ज्योतींषि वि
ष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च॥ नद्यः समुद्रा
श्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्येति श्रीविष्णुपुरा
णे॥ आदित्यानामहं विष्णुरित्यादिस्मृतेः॥ अथवा बहुनैतेन किं ज्ञाते
न तवार्जुन॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्यंते
न श्रीगीतोपनिषत्सु भगवतैवोक्तेः॥ ब्रह्मैवेदं विश्वमिदं वरिष्ठं
पुरुष एवेदं विश्वं इत्यादिश्रुतेश्च॥ वषट्कारादिशब्दानां पुन
रुक्तानामपि वृत्तिभेदान्न पौनरुक्त्यं॥ श्रीपतिर्माधव इत्यादि
नां च एकत्वेपि शब्दभेदान्न पौनरुक्त्यं॥ अर्थैक्ये पौनरुक्त्यं न
दोषाय नाम्नां सहस्रस्य किमेकं दैवतमिति पृष्ट एकं दैवतं

22

११

विषयत्वात्॥ यत्र पुंल्लिंगशब्दप्रयोगः तत्र विष्णुर्विशेष्यो यत्र
स्त्रिलिंगशब्दप्रयोगस्तत्र देवताविशेष्यते॥ यत्र नपुंसकशब्द
प्रयोगस्तत्र ब्रह्मविशेषणीय॥१३॥ ॐ विश्वं विष्णुर्वषट्का
रो भूतभव्यभवत्प्रभुः॥ यतः सर्वाणि भूतानि इत्यारभ्यतगेदु
सृतिस्थितिलयकारणस्य ब्रह्मण एकदेवकत्वेनाभिहितत्वा
दास्यकुमयविधब्रह्मविश्वशब्देनो [illegible] च्यते॥ वि
श्वस्य जगतः कारणत्वेन विश्वमित्युच्यते ब्रह्म आदौ तु विश्व
मिति कार्यशब्देन कारणग्रहणं कार्यभूतविरिंआदिनामत्वा
नुपपन्नास्तुतिर्विष्णोरिति दर्शयितुं॥ यद्वा परस्मात्पुरुषाद्भि
भिन्नमिदं विश्वं परमार्थतस्तेन विश्वमित्यभिधीयते॥ ब्रह्मैवे
दं वरिष्ठं॥ पुरुष एवेदं विश्वमित्यादिश्रुतेः [illegible] स्तद्भिन्नं न कि ११
चित्परमार्थतः सदस्ति॥ अथवा विशतीति विश्वं ब्रह्मनस्ये
स्यविश्वमिदं

23

× तथाहि॥ सकलं जगत्कार्यभूतमेव विविच्य तत्र चाखिलं विशन्तीत्युक्तम यथापि
पिण्डं ब्रह्मेति श्रुतेः॥३

ष्ट्वा तदेवानुप्राविशदिति श्रुतेः किंच संहृतो विशन्ति सर्वाणि
भूतानि यस्मिन्निति विश्वं ब्रह्म॥ यत्प्रयन्त्यभिसंविशन्तीति श्रुतेः
नचिकेतसा पृष्टो मृत्युरुवाच॥ अन्यत्र धर्मादन्यत्राधर्मादि
सारस्य सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति॥ य
दिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि॥ ओमित्ये
तत्॥ एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परं॥ एतद्ध्येवाक्षरं ज्ञा
त्वा यो यदिच्छति तस्य तत्॥ ओमिति ब्रह्म ओमितीदं सर्वं॥
तद्यथा शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण स
र्वा वाक् संतृण्णा॥ एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः इत्यु
पक्रम्य यः पुनरेतं त्रिमात्रेण॥ ओमित्येतेनैवाक्षरेण परं
पुरुषमभिध्यायीत॥ ओंकार एवेदं सर्वं॥ ओमित्येतदक्षर
मिदं सर्वमित्युपक्रम्य प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं

24

१२

स्मृतः ॥ अपूर्वोनंतरो बाह्योनपरः प्रणवोव्ययः ॥ सर्वस्य प्रणवो
ह्यादिर्मध्यमंतस्तथैवच ॥ ८ एवंहि प्रणवं ज्ञात्वा व्यश्नुते तदनं
तरं ॥ प्रणवं हीश्वरं विद्यात्सर्वस्य हृदये स्थितं ॥ सर्वव्यापिन
मोंकारं मत्वा धीरो न शोचति ॥ अमात्रोनंतमात्रश्च द्वैतस्यो
पशमः शिवः ॥ ओंकारो विदितो येन स मुनिर्नेतरो जन इत्या
त्मा मांडूक्योपनिषत्सु ॥ ॐ तद्ब्रह्म ॐ तद्वायुः ॥ ॐ तदात्मा ॐ त
त्सत्यं ॥ ॐ तत्सर्वं ॥ ॐ तत्पुरोर्नमः ॥ १ इत्यादिश्रुतिभिः ॥ ॐ
मित्येकाक्षरं ब्रह्म रसोहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः
प्रणवः सर्ववेदेषु गिरामस्म्येकमक्षरं ॥ आद्यं हित्र्यक्षरं ब्रह्म
त्रयी यस्मिन्प्रतिष्ठिता ॥ एकाक्षरं परं ब्रह्म प्राणायामः परं त
पः ॥ प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः ॥ [illegible] वाङ्म
यप्रणवं सर्वं तस्मात्प्रणवमभ्यसेत् ॥ २ इत्यादिस्मृतिभिश्च वि

१२

25

शब्देनोंकारोप्यभिधीयते॥ वाच्यवाचकयोरसंतभेदाभावाद्वि
श्वमित्योंकार एव ब्रह्मेत्यर्थः॥ किमेकं दैवतं लोके किं वाप्येकं प
रायणं यतः सर्वाणि इत्यादिना पद्मलोचनं तद्विश्वशब्देनोच्यमि
तिव्याख्यातं॥ तत्किमित्याकांक्षायामाह॥ विष्णुरिति॥ तथा
च स्कंदे॥ अस्य ज्ञानेतो नामचिद्विविरे नमस्त्तेर्यिस्तुमति १ष्ठोः५
मतामहत्स्वात्सर्वाक्ये विष्णुनामसंकीर्तने॥ नसम्यक्कं ज्ञानमा
प्तिर्विहिता॥ वेवेति व्याप्नोतीति विष्णुः॥ विषयव्याप्याभिधा
पिनो नुप्रसयात स्यरूपं देशकालवस्तुपरिच्छेदशून्यं न्यद
सर्वं॥ अंतर्बहिश्च तत्सर्वं व्याप्य नारायणस्थित इतिव्या
सि श्रुतेः॥ विशते र्वानुप्रसयात स्यरूपं विष्णुरिति॥ यस्माद्वि
श्वमिदं सर्वं तस्य शक्त्या महात्मनः॥ तस्मात्स देवोच्यते विष्णु
र्विशोर्धातोः प्रवेशनादिति श्रीविष्णुपुराणे॥ यद्दुद्देशेन वृ
षट्क्रियास वषट्कारः॥ यस्मिन्यज्ञे वा वषट्क्रिया॥ यज्ञे वे

26

विष्णुरिति श्रुतेः॥ यज्ञो वषट्कारः॥ वषट्कारादिमंत्रात्मना देवान्
प्रीणयतीति वा॥ प्रजापतिश्च वषट्कारश्चेति देवता वा॥ भूतभव्यभ
वत्प्रभुः भूतं भव्यं भवंतीति तेषां प्रभुः भूतं भव्यं भवत्प्रभुः॥ कालत्रयमना
दृत्य सन्मात्रप्रतियोगिकमैश्वर्यमस्येति प्रभुत्वं भूतकृद्भूतभृद्भावो
भूतात्मा भूतभावनः॥ रजोगुणं समाश्रित्य विरंचिरूपेण भूतानि
करोतीति भूतकृत्॥ तमोगुणमधिष्ठाय रुद्रात्मना वा कृंतति कृणोति
हिनस्तीति वा॥ सत्त्वगुणमधिष्ठाय भूतानि बिभर्ति धारयति पो
षयतीति वा भूतभृत्॥ प्रपंचरूपेण भवतीति केवलं भवत्येवेति वा भावः॥ भव
नं भावः॥ सत्तात्मको वा॥ भूतानामात्मा तेषामिति॥ भूतात्मा॥ एष त आ
त्मांतर्यामीति श्रुतेः॥ भूतानि भावयति जनयति वर्धयतीति वा भूतभावनः॥
भूतकृदादि त्रिगुणात्रयत्वे प्राप्तमप्रतिषिध्यते॥१॥ पूतात्मेति॥ पूता
त्मा परमात्मा च मुक्तानां परमा गतिः॥ अव्ययः पुरुषः साक्षी क्षेत्रज्ञो
ऽक्षर एव च॥१२॥ पूतः आत्मा यस्य स पूतात्मा॥ कर्मधारयो वा॥ केवलो
निर्गुणश्चेति श्रुतेः॥ गुणोपरागः स्पर्शो नतः पुरुषस्येति लक्ष्यते॥[illegible]॥ १३

परमश्चासावात्मा चेति परमात्मा कार्यकारणविलक्षणो नित्यशुद्धबुद्धमुक्त-
स्वभावः ॥ मुक्तानां परमा गतिर्गंतव्या देवता पुनरावृत्त्यसंभवो गमितस्येति
॥ मुक्तानां परमा गतिः ॥ मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते इति भगवद्व-
चनं ॥ न व्येति नास्य व्ययो विनाशो विकारो वा विद्यत इत्यव्ययः ॥ अजरो-
मर इति श्रुते ॥ पुरं शरीरं तस्मिंछेते इति पुरुषः ॥ नवद्वारं पुरं पुण्य-
मेतैर्भावैः समन्वितं ॥ व्याप्य शेते महात्मा यस्तस्मात्पुरुष उच्यते ॥ इ-
ति महाभारते ॥ अस्तेर्व्यस्ताक्षरयोगात् ॥ आसीत्पुरा पूर्वमेवेति विग्र-
हे कृत्वा पृषोदरादित्वात् पुरुषः पूर्वमेवाहमितासमिति तत्पुरुषस्य पुरुष-
त्वमिति श्रुतेः ॥ पुरुषु भूरिषु उत्कर्षशालिषु सत्वेषु सीदतीति वा ॥
पूर्णत्वाद्वा पुराणत्वाद्वा सदनाद्वा पुरुषः ॥ पूरणात्सदनाच्चैव यतोसौ
पुरुषोत्तमात इति पंचमे वेदे ॥ साक्षादव्यवधानेन स्वरूपबोधेन पश्य-
ति सर्वमिति साक्षी ॥ साक्षात् द्रष्टरि संज्ञायामिति पाणिनिवचनादि-
त्यर्थः ॥ क्षेत्रज्ञं चापि मां विद्धि इति भगवद्वचनात् ॥ क्षेत्राख्यानि शरी-
राणि तेषां चैव यथासुखं ॥ तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यत इति
ब्रह्मपुराणे ॥ स एव न क्षरतीत्यक्षरः ॥ परमात्मा च अश्नोतेर्वा सरप्र-

×पूरुणि फलानि सनोति ददातीति वा पुरुणि भुवना
नि संहारसमये स्वसंतं करोतीति वा ८

त्सयातस्यरूपमक्षरइतिएवंकारात् क्षेत्रज्ञाक्षरयोरभेदः परमार्थतस्तत्व
मस्यादि श्रुतेश्च चकाराद्युपाधिकृतोभेदः ॥ प्रसिद्धः परमार्थत्वात् ॥१७॥
योगो योगविदां नेता प्रधानपुरुषेश्वरः ॥ नारसिंहवपुः श्रीमान् केश
वः पुरुषोत्तमः ॥१८॥ ज्ञानेन्द्रियाणि सर्वाणि निरुध्य मनसा सह ॥ एकत्वभा
वना योगः क्षेत्रज्ञपरमात्मनोः स योगः ॥ तद्व्याप्यतया योगः विचारयं
ति जानन्तिलभंतइतिवा योगविदस्तेषां नेता ज्ञानिनां योगक्षेमं वहन्नादि
नेति योगविदां नेता ॥ प्रधानं प्रकृतिर्माया पुरुषो जीवस्तयोरीश्वरः प्रधा
नपुरुषेश्वरः ॥१९॥ नरस्य सिंहस्य चावयवा यस्मिन् लक्ष्यन्ते तद्वपुर्य
स्य स नारसिंहवपुः ॥ यस्य वक्षसि नित्यं वसति श्रीः स श्रीमान् ॥ अभि
रूपाः केशा यस्य स केशवः ॥ केशाद्वान्यरस्यामितिवप्रत्ययः प्रशंसायां
॥ यद्वा कश्च अश्च ईशश्च त्रिमूर्तयः केशास्ते यद्वशे वर्तन्ते स केशवः
केशिवधाद्वा ॥ यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन ॥ तस्मात्केशव
नाम्ना त्वं लोके ज्ञेयो भविष्यसि ॥ श्रीविष्णुपुराणे श्रीकृष्णं प्रति नारदवचनं ॥ १४
पृषोदरादित्वाद्धि साधुत्वकल्पना ॥ पुरुषाणामुत्तमः पुरुषोत्तमः ॥

अत्र न निर्धारण इति षष्ठीसमासप्रतिसेधो न भवति ॥ ज्ञानसाधनपेक्षया असम
र्थत्वात् ॥ यत्र पुनर्जातिगुणक्रियापेक्षया पृथक्क्रियते तत्रासमर्थत्वान्निषे
धः प्रवर्त्तते ॥ मनुष्याणां क्षत्रियः शूरतमः ॥ गवां कृष्णा गौः संपन्नक्षीरतमा
अध्वगाणां धावन्छ्रान्ततम इति ॥ अथवा पंचमीसमासः ॥ तथा च भग
वद्वचनं ॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ॥ अतोऽस्मि लोके वेदे च
प्रथितः पुरुषोत्तमः ॥ इति ॥ असतश्च सतश्चैव सर्वस्य प्रभवाप्यया ॥
सर्वस्य सर्वदा ज्ञानात्सर्वमेनं प्रचक्षते इति भगवद्व्यासवचनात्सर्वः ॥ ३ ॥ सर्वः
शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ॥ संभवो भावनो भर्ता प्रभवः प्रभु
रीश्वरः ॥ ४ ॥ सर्वः ॥ शृणाति सकलाः प्रजाः संहारयति ॥ शर्वः ॥ निस्त्रैगु
ण्यतया शुद्धत्वाच्छिवः ॥ स ब्रह्म स शिव इति अभेदादेशाच्छिवादिना
मभिर्हरिरेव स्तूयते ॥ स्थिरत्वात्स्थाणुः ॥ भूतानामादिः कारणत्वाद्धि
भूतादिः ॥ प्रलयेऽस्मिन्सर्वं निधीयते इति निधिः ॥ कर्मण्यधिकरणे च
ति किः प्रत्ययः ॥ स एव निधिर्विशेष्यते अव्यय इति अनश्वरो निधि
रित्यर्थः ॥ स्वेच्छया समीचीनं भवनमस्येति संभवः ॥ धर्मसंस्थापनार्थाय सं
भवामि युगे युगे इति भगवद्वचनात् ॥ तथा दुष्टविनाशाय साधूनां रक्षणाय
च ॥ स्वेच्छया संभवान्मेवं गर्भदुःखविवर्जितः इति वा ॥ सर्वेषां भोक्तॄणां फलानि

३०

भावयतीति भवनः ॥ सर्वफलदातृत्वं फलमत उपपत्तेरिति सूत्रप्रतिपादितं ॥ प्रप
चस्य अधिष्ठानत्वेन धारणाद्वा ॥ प्रकर्षेण महाभूतानि अस्माज्जायंते
इति प्रभवः ॥ प्रकृष्टभावो जन्मास्येति वा ॥ सर्वासु सामर्थ्यातिशयात्प्रभुः ॥४॥ क्रियासु
निरुपाधिकमैश्वर्यमस्येति ईश्वरः ॥ एष सर्वेश्वर इति श्रुतेः ॥ ४ ॥ स्वयंभूः
शंभुरादित्यः पुष्कराक्षो महास्वनः ॥ अनादिनिधनो धाता विधाता धातु
रुत्तमः ॥५॥ स्वयमेव भवतीति स्वयंभूः ॥ स एव स्वयमुद्भवति इति मान
वैश्च ॥ एषां चाप्युपरि भवतीति स्वयं भवतीति वा स्वयंभूः ॥ परिभूः स्व
यंभूरिति मंत्रवर्णात् ॥ शं सुखं भक्तानां भावयतीति शंभुः ॥ आदित्यमं
डलांतस्थो हिरण्मयः पुरुष आदित्यः ॥ द्वादशादित्येषु विष्णुर्वा ॥ आदि
त्यानामहं विष्णुरित्युक्तेः ॥ आदितेरखंडिताया अयं पतिरिति वा ॥ इयं वा
अदितिर्महि देवी विष्णुपत्नीति श्रुतेः ॥ यथादित्य एक एवानेकेषु जल
भाजनेष्वनेकधा प्रतिभासते ॥ एवमनेकेषु शरीरेषु एक एवानेकधा प्र
तिभासत इत्यादित्यसाधर्म्याद्वादित्यः ॥ पुष्करेणोपमिते अक्षिणी यस्ये १५
ति पुष्कराक्षः ॥ ५० ॥ महानूर्जितः स्वनो नादो वा श्रुतिलक्षणो यस्य स
महास्वनः ॥ सन्महदित्यादिना समासे कृते आन्महतः समानाधिकरण

जोनियचोरित्यात्वं।। अस्य महतो भूतस्य निश्वसितमेतदृग्वेदो यजुर्वेदः
सादि श्रुतेः।। आदिर्जन्म निधनं विनाशस्तद्द्वयं यस्य न विद्यते सोनादिनिध
नः।। अनन्तादिरूपेण विश्वं बिभर्ति धाता।। कर्मणां
तत्फलानां च कर्ता विधाता।। अनन्तादीनामपि धारकत्वाद्विशेषणं दधातीति वा
धातुरुत्तम इति नामैकं सविशेषणं सामानाधिकरण्येन।। सर्वधातुभ्यः
पृथिव्यादिभ्यः उत्कृष्टश्चिद्धातुरित्यर्थः।। धातुर्विरिंचेरुत्कृष्ट इति वा।।
नामद्वयं वा।। कार्यकारणप्रपंचधारणाश्चिद्धातुरुत्तमः।। सर्वेषामु
त्तानामतिशयेनोद्भवत्वादुत्तमः।।५।। अप्रमेयो हृषीकेशः पद्मनाभोम
रप्रभुः।। विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः।।६।। शब्दादिरहि
तत्वाच्च प्रत्यक्षगम्यः।। नाप्यनुमानविषयस्तद्व्याप्तलिंगाभावात्।। नाप्युप
मानसिद्धो निर्भागत्वेन सादृश्याभावात्।। नाप्यर्थापत्तिग्राह्यस्तद्विनानुप
पध मानस्यासंभवात्।। नाप्यभावगोचरो भावरूपत्वात्।। अभावसाक्षि
त्वाच्च न षट्प्रमाणगम्यः।। नापि शास्त्रप्रमाणवेद्यः प्रमाणजन्यज्ञानातिशा
पाभावात्।। यद्येवं शास्त्रयोनित्वं कथमुच्यते।। प्रमाणादिसाक्षित्वेन प्रका
शस्वरूपस्य प्रमाणाविषयत्वे अध्यस्तातद्रूपनिवर्तकत्वेन शास्त्रप्रमाण
कत्वमित्यप्रमेयः।। साक्षित्वाद्धृषीकाणीन्द्रियाणि तेषामीशः क्षेत्रज्ञरूपभा

32

चंद्ररूपस्य

कृ॥ यद्देंद्रियाणि यस्य वशे वर्त्तंते स परत्मा॥ यस्य वा सूर्यरूपस्यं जगत्प्रीतिकराः हृष्टाः केशाः रश्मयः स हृषीकेशः॥ पृषोदरादित्वं॥ तथा चोक्तं मोक्षधर्मे॥ सूर्यचंद्रमसोः शश्वदंशुभिः केशसंज्ञितैः॥ बोधयन्स्वापयंश्चैव जगदुत्तिष्ठते पृथक्॥ बोधनात्स्वापनाच्चैव जगतो हर्षणं भवेत्॥ अग्नीषोमकृतैरेवं कर्मभिः पाण्डुनंदन॥ हृषीकेशो महीशानो वरदो लोकभावन इति॥ जगत्कारणं पद्मं नाभौ यस्य स पद्मनाभः॥ अजस्य नाभावध्येकमर्पितमिति श्रुतेः॥ पृषोदरादित्वात्साधुत्वं॥ अमराणां प्रभुरमरप्रभुः॥ विश्वकर्म क्रिया तदिति जगत्कर्म विश्वं कर्म यस्य स विश्वकर्मा विचित्रनिर्माणसमर्थत्वाद्विश्वकर्मणा त्वष्टा सादृश्याद्वा॥ ६०॥ मननान्मनुः॥ नान्यतोऽस्ति मंतेति श्रुतेः॥ मंत्रो वा प्रजापतिर्वा॥ संहारसमये सर्वभूतानि तनूकरणात्त्वष्टा॥ त्वक्षस्तनूकरणार्थात्तृच्प्रत्ययः॥ अतिशयेन स्थूलः स्थविष्ठः॥ पुराणः स्थविरः॥ एकस्यस्य स्थविरस्य नामेति वृद्धाः॥ वयो वचनो वा॥ स्थिरत्वाद्ध्रुवः॥ स्थविरो ध्रुव इत्येकं नाम सविशेषणं॥ ६॥ अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः॥ प्रभूतस्त्रिककुब्धाम पवित्रं मंगलं परं॥ ७॥ इंद्रियैर्न ग्राह्य इत्यग्राह्यः॥ यतो वाचो निवर्तंते अप्राप्य मनसा सह इति श्रुतेः॥

ले

१५

शश्वत्सर्वेषु कालेषु भवतीति शाश्वतः ॥ शाश्वतं शिवमच्युतमिति श्रु-
तेः ॥ कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ॥ कृष्णस्तद्भावयोगा-
च्च कृष्णो भवति शाश्वतः ॥ इति व्यासवचनात् सदानन्दात्मकः कृष्णः ॥ पार्थ ॥
भूत्वा कार्ष्णायसो हलः ॥ कृष्णवर्णश्च मे यस्मात्तस्मात्कृष्णोहमर्जुनेति
च महाभारते ॥ लोहिते अक्षिणी अस्येति लोहिताक्षः ॥ समावृषभो लो-
हिताक्ष इति श्रुतेः ॥ प्रलये भूतानि हिनस्तीति प्रतर्दनः ॥ ज्ञानैश्वर्यादि-
गुणैः संपन्नः प्रभूतः ॥ ६० ॥ ऊर्ध्वाधोमध्यभेदेन तिसृणां ककुभामपि
धामेति त्रिककुब्धामेत्येकमिदं नाम ॥ तेन पुनाति ऋषिदेवता वा तत्पवि-
त्रं वा ॥ पुवः संज्ञायां करणे चर्षिदेवतयोरिति भगवत्पाणिनिस्मरणादि-
त्रच्प्रत्ययः ॥ अशुभानि निराचष्टे तनोति शुभसंततिं ॥ स्मृतिमात्रेण
यत्पुंसां ब्रह्म तन्मंगलं विदुरिति श्रीविष्णुपुराणवचनात्कल्याणरू-
पत्वान्मंगलं ॥ परं सर्वभूतेभ्य उत्कर्षात् परमंगलमित्येकं नामेदं स-
विशेषणं ॥ ७ ॥ ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ॥ हिरण्यग-
र्भो भूगर्भो माधवो मधुसूदनः ॥ ८ ॥ सर्वभूतानि नियन्तृत्वादीशानः ॥
प्राणान्ददाति चेष्टयतीति प्राणदः ॥ को ह्येवान्यात्कः प्राण्यादिति श्रुतेः ॥

34

१७

यद्वा प्राणान् द्यति लुनातीति प्राणदः ॥ प्राणो क्षेत्रज्ञः परमात्मा वा ॥ प्राणस्य
प्राणमिति श्रुतेः ॥ मुख्यप्राणो वा ॥ वृद्धतमो ज्येष्ठः ॥ ज्येसधिकारे वृद्धस्य
चेति वृद्धशब्दस्य ज्यादेशविधानात् प्रशस्यतमः श्रेष्ठः ॥ प्रशस्यस्य श्र इ
ति श्रादेशविधानात् ॥ प्राणो वाव ज्येष्ठश्च श्रेष्ठश्चेति श्रुतेर्मुख्यप्राणो वा ॥ ज्ये
ष्ठश्रेसधिकेरणे सिद्धत्वात् ॥ सर्वकारणत्वाज्ज्येष्ठः ॥ सर्वातिशयत्वाच्छ
श्रेष्ठः ॥ ईश्वरत्वेन सर्वासां प्रजानां पतिः प्रजापतिः ॥ हिरण्मयाण्डान्तर्वर्ति
सत्वाद्धिरण्यगर्भो ब्रह्मा ॥ विरिञ्च्यात्मेना वा ॥ हिरण्यगर्भः समवर्तता
ग्र इति श्रुतेः ॥ ७० ॥ भूर्गर्भो यस्य स भूगर्भः ॥ मायाः श्रियो धवः पतिः
माधवः ॥ मधुविद्यावबोधकत्वाद्वा ॥ मौनाद्ध्यानाच्च योगाच्च विद्धि भा
रत माधवमिति व्यासवचनाद्वा माधवः ॥ मधुनामानमसुरं सू
दितवानिति मधुसूदनः ॥ कर्ममिश्रोद्भवं चापि मधुनाम महासुर
ब्रह्मणोपचितिं कुर्वन् जघान पुरुषोत्तमः ॥ तस्य तात वधाद्देव देव वो
दानवमानवाः ॥ मधुसूदन इत्याहु ऋषयश्च जनार्दनमिति मता
मोरत्वे ॥ ८ ॥ ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ॥ अनु १७
त्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९ ॥ सर्वशक्तिमत्तयाई

श्रिनि विनि ४

धरः ॥ विक्रमं शौर्यं तद्योगाद्विक्रमी ॥ धनुरस्यास्तीति धन्वी ॥ श्री
धरादिव्याहृतिः ॥ रामः शस्त्रभृतामहमिति भगवद्वचनात् ॥ मेधा
बहुग्रंथधारणसामर्थ्यमस्यास्तीति मेधावी ॥ अस्या या मेधा स्त्र
मोविनिम्नलयः ॥ विक्रमे जगद्विश्वं तेन विक्रमः ॥ विना गरुडेन प
क्षिणा क्रमत्वाद्वा ॥ क्रमणात्क्रमहेतुत्वाद्वा क्रमो विष्णुरिति मनुवच
नात् ॥ अविद्यमान उत्तमो यस्यासावनुत्तमः ॥ यस्मात्परं मिति श्रु
तेः ॥ न त्वत्समोस्त्यभ्यधिकः कुतोन्य इति स्मृतेः ॥८०॥ दैत्यादिभि
र्धर्षयितुं न शक्यत इति दुराधर्षः ॥ प्राणिनां पुण्यापुण्यात्मकं कर्म कृतं
जानातीति कृतज्ञः ॥ पत्रपुष्पाद्यल्पमपि प्रयच्छतां मोक्षं ददातीति वा ॥ पु
रुषप्रयत्नः कृतिः क्रिया वा सर्वात्मकत्वात्तदाधारतया वा लक्ष्यते
इति वा कृतिः ॥ स्वे महिम्नि प्रतिष्ठितत्वादात्मवान् ॥ स भगवः कस्मि
न्प्रतिष्ठित इति स्वे महिम्नि इति श्रुतेः ॥९॥ सुरेशः शरणं शर्म विश्व
रेताः प्रजाभवः ॥ अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥१०॥ सुरा
णां देवानां शोभनदातृणां चेशः सुरेशः ॥ आर्तानामार्तिहरत्वाच्छर

36

णं॥ परमानंदरूपत्वाच्छर्म॥ विश्वस्य कारणत्वाद्विश्वरेताः॥ सर्वाः प्रजाः
यत्सकाशात्प्रादुर्भवंतीति स प्रजाभवः॥ प्रकाशरूपत्वादहः॥९॥ काला
त्मना स्थितो विष्णुः संवत्सर इति स्मृतः॥ व्यालवद्ग्रहीतुमशक्यत्वाद्व्यालः॥
प्रतीतिः प्रज्ञा प्रत्ययः॥ प्रज्ञानं ब्रह्मेति श्रुतेः॥ सर्वदर्शनः॥१०॥ अजः स
र्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः॥ वृषाकपिरमेयात्मा सर्वयो
गविनिःसृतः॥११॥ न जायत इत्यजः॥ न जातो न जनिष्यत इति श्रुतेः॥ न
हि जातो न जायेहं न जनिष्ये कदाचन॥ क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः
स्मृतः॥ इति महाभारते॥ सर्वेषामीश्वराणामीश्वरः सर्वेश्वरः॥ एष स
र्वेश्वर इति श्रुतेः॥ नित्यनिष्पन्नरूपत्वात्सिद्धः॥ सर्ववस्तुषु संविद्रू
पत्वान्निरतिशयफलरूपत्वाद्वा सिद्धिः॥ स्वर्गादीनां विनाशित्वादफल
त्वं॥ सर्वभूतानामादिकारणत्वादिति सर्वादिः॥ स्वरूपसामर्थ्येन
न च्युतो न च्यवते न च्यविष्यत इत्यच्युतः॥ शाश्वतं शिवमच्युतमि
ति श्रुतेः॥ तथा भगवद्वचनं॥ यस्मान्न च्युतपूर्वोहमच्युतस्तेन क
र्मणा॥ इति नाम्नां शतमाद्यं विवृतं॥१००॥ विश्वपरमात्मानो १८

37

रसितं वपुः सं न यो मनसा स्वनो मनस्विकक्षाम भूगर्भो दुराधर्षः सं
वत्सरः ॥ वर्षणात्सर्वकामानां वृषः ॥ कं तोयं यावत् भूमिमपादिति क
पिर्वराहः ॥ वृषरूपत्वात्कपिरूपत्वाच्च वृषाकपिः ॥ कपिर्वराहः श्रेष्ठश्च
धर्मश्च वृष उच्यते ॥ तस्माद्वृषाकपिं प्राह काश्यपो मां प्रजापतिः ॥
इति महाभारते ॥ इयानिति मातुं परिच्छेत्तुं न शक्यते आत्मा सोमेया
त्मा ॥ सर्वसंबंधविनिर्गतः ॥ सर्वयोगविनिःसृतः ॥ असंगो ह्ययं पु
रुषो इति श्रुतेः ॥ नानाशास्त्रोक्तयोगादपगतो वा ॥११॥ वसुर्व
सुमनाः सत्यः समात्मा सम्मितः समः ॥ अमोघः पुंडरीकाक्षो वृषक
र्मा वृषाकृतिः ॥१२॥ वसंति सर्वभूतान्यत्र तेष्वयमपि वसतीति
ति वसुः ॥ वसूनामस्मि पावकः इत्युक्तेर्वा वसुः ॥ वसुशब्देन धन
वाचिना प्राधान्यस्य लक्ष्यते ॥ प्रशस्तेन मनो यस्य स वसुमनाः ॥ रा
गद्वेषादिभिः क्लेशैः मदादिभिरुपक्लेशैश्च यतो कलुषितं चित्तमत
तस्तस्मान्मनः प्रशस्तं ॥ अवितथरूपत्वात्परमात्मा सत्यः ॥ सत्यं ज्ञानमनं
तं ब्रह्मेति श्रुतेः ॥ मूर्तामूर्तात्मकत्वाद्वा ॥ सच्च त्यच्चाभवदिति श्रुतेः ॥
सदिति प्राणास्तीत्यन्नं यमिति दिवाकरस्तेन ॥ प्राणान्नादित्यरूपत्वाद्वा

११

सदिति प्राणस्तीत्यन्नं यमित्यसावादित्य इति श्रुतेः ॥ सत्यः ॥ सत्सु साधु
त्वाद्वा सत्यः ॥ समात्मा ॥ समः आत्मा मनो यस्य रागद्वेषादिभिरदूषितः स समात्मा
सर्वभूतेषु समः एक आत्मा वा ॥ समम् आत्मेति विद्यादिति श्रुतेः ॥ स
र्वैरर्थप्रज्ञातैः परिच्छिन्नो मितः ॥ सर्वैरपरिच्छिन्नो मित इत्यसम्मितो वा
सर्वकालेषु सर्वविकाररहितत्वात् समः ॥ मया लक्ष्म्या सह वर्तत इ
ति वा समः ॥ पूजितः स्तुतः संस्मृतो वा सर्वफलं ददाति न वृथा करोती
त्यमोघः ॥१०१॥ अर्चितस्यासंकल्पाद्वा सत्यसंकल्प इति श्रुतेः ॥
हृदयस्थं पुण्डरीकमश्नुते व्याप्नोति तत्रोपलक्षित इति पुण्डरीकाक्षः ॥ पु
हृत्पुण्डरीके परमध्यासंस्थमिति श्रुतेः ॥ पुण्डरीकाकारे अक्षिणी उभे अस्ये
ति वा ॥ वृषं धर्मलक्षणं कर्म अस्येति वृषकर्मा ॥ धर्मार्थमाकृतिरस्ये
ति वृषाकृतिः ॥ धर्मसंस्थापनार्थाय संभवामि युगे युगे इति भगवद्वचना
त् ॥१०२॥ रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ॥ अमृतः ११
शाश्वतः स्थाणुर्वरारोहो महातपाः ॥१०३॥ संहारकाले प्रजाः
संहरन् रोदयतीति रुद्रः ॥ रुदं ददातीति ददाति वा रुद्रः ॥ रुत् दुःखं दुःखकारणं

वा द्रावयतीति रुद्रः॥ रुद्र इत्युच्यते तस्माद्द्विजैः परमकारणमिति लिं
गपुराणवचनात्॥ बहूनि शिरांस्यस्येति बहुशिराः॥ सहस्रशी
र्षेति श्रुतेः॥ बिभर्ति लोकानिति बभ्रुः॥ विश्वस्य कारणत्वानू
विश्वयोनिः॥ शुचीनि श्रवांसि नामानि श्रवणीयान्यस्येति शुची
श्रवाः॥ न विद्यते मृतं मरणमस्येत्यमृतः॥ अजरोमर इति श्रुतेः
शाश्वतश्चासौ स्थाणुश्चेति शाश्वतस्थाणुः॥२०॥ वर आरोहो
लोकस्येति वरारोहः॥ वरमारोहणं यस्मिन्निति वा॥ आरूढानां
पुनरावृत्त्यसंभवात्॥ न स पुनरावर्तत इति श्रुतेः॥ यं प्राप्य न नि
वर्तंत इति स्मृतेः॥ महत् सृष्टिविषयं तपो ज्ञानमस्येति महा
तपाः॥ यस्य ज्ञानमयं तप इति मंत्रवर्णात्॥ ऐश्वर्यप्रतापो वा म
हदस्येति महातपाः॥१३॥ सर्वगः सर्वविद्भानुर्विष्वक्सेनो ज
नार्दनः॥ वेदो वेदविदव्यंगो वेदांगो वेदवित्कविः॥१४॥ सर्वं
गच्छतीति सर्वगः॥ कारणत्वेन व्याप्तत्वात्॥ सर्वत्र सर्वं वेत्ति वि
दतीति वा सर्ववित्॥ भातीति भानुः॥ तमेव भांतमनुभाति सर्वमि
ति श्रुतेः॥ यदादित्यगतं तेज इत्यादि स्मृतेश्च॥ सर्वविश्वासोमा

40

तु॥श्वा॥ति श्वगंचेति पलायंते दैत्यसेना यस्य रणोद्योगमात्रेणेति वि
श्वक्सेनः॥ जनानर्दयति हिनस्ति नरकादीनामयतीति वा॥ जनैः
पुरुषार्थमभ्युदयनिःश्रेयसलक्षणं याच्यते वा इति जनार्दनः॥ वे
दयतीति वेदः तेषामेवानुकंपार्थमहमज्ञानजं तमः॥ नाशया
म्यात्मभावस्थो ज्ञानदीपेन भास्वतेति भगवद्वचनात्॥ यथावद्वेदं
वेदार्थं च वेत्ति विंदते वेति वेदवित्॥ वेदांतकृद्वेदविदेव चाहमि
ति भगवद्वचनात्॥ सर्वे वेदाः सर्वा विद्याः सशास्त्राः सर्वे य
ज्ञाः सर्व इज्यश्च कृष्णः॥ विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये तेषां
राजन्सर्वयज्ञाः समाप्ता इति महाभारते॥ अव्यंगः ज्ञानादि
भिः परिपूर्णो विकलश्च्यते॥ व्यंगो व्यक्तिं नैव धत्ते इति अ
व्यंगो वा॥ अव्यक्तोयमिति भगवद्वचनात्॥ वेदा अंगभूता य
स्य स वेदांगः॥ ३०॥ वेदान् विचारयतीति वेदवित्॥ क्रांतदर्शी
कविः॥ सर्वदृक् नान्योतोस्ति द्रष्टेत्यादिश्रुतेः॥ कविर्मनीषीति
मंत्रवर्णात्॥ ३१॥ लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृ

२०

41

तः॥ चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः॥१५॥ लोकानध्यक्षयती
ति लोकाध्यक्षः॥ सर्वेषां लोकानां प्राधान्येनोपद्रष्टा॥ लोकपालादिसुरा
णामध्यक्षः सुराध्यक्षः॥ धर्माधर्मौ साक्षादीक्षतेनुरूपं फलं दातुं तस्मा
द्धर्माध्यक्षः॥ कृतश्च कार्यरूपेणाकृतश्च कारणरूपेणेति कृताकृतः॥
सर्गादिषु पृथग्विभूतयश्चतस्रोस्येति चतुरात्मा॥ ब्रह्मा दक्षादयः का
लस्तथैवाखिलजंतवः॥ विभूतयो हरेरेता जगतः सृष्टिहेतवः॥ विष्णु
र्मन्वादयः कालः सर्वभूतानि च द्विज॥ स्थितेर्निमित्तभूतस्य विष्णोरेता
विभूतयः॥ रुद्रः कालोंतकाद्याश्च समस्ताश्चैव जंतवः॥ चतुर्धा प्रल
यायैता जनार्दनविभूतय इति वैष्णवे पुराणे॥ व्यूहात्मना चतुर्धा वा
सुदेवादिमूर्तिभिः॥ सृष्ट्यादीन्प्रकरोत्येष विस्तृतात्मा जनार्दन इति व्या
सवचनात् चतुर्व्यूहः॥ दंष्ट्राश्चतस्रोस्येति चतुर्दंष्ट्रो नृसिंहवि
ग्रहः॥ यद्वा शृंगदंष्ट्र उच्यते॥ चत्वारि शृंगेति श्रुतेः॥ चत्वारो भुजा
अस्येति चतुर्भुजः॥४०॥१५॥ भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जग
दादिजः॥ अनघो विजयो जेता विश्वयोनिः पुनर्वसुः॥१६॥ प्रकाशैक
रसत्वाद्भ्राजिष्णुः॥ भोज्यरूपतया प्रकृतिर्माया भोजनं प्रकृतिरुच्यते॥

42

२१

पुरुषरूपेण तामृतस्य इति भोक्ता ॥ हिरण्याक्षादीन् सहते अभिभवतीति सहि-
ष्णुः ॥ हिरण्यगर्भरूपेण जगतामादावुत्पद्यते स्वयमिति जगदादिजः ॥ अघं न
विद्यते यस्य सः अनघः ॥ अपहतपाप्मेति श्रुतेः ॥ विजयते ज्ञानवैराग्यैश्व-
र्यादिभिर्गुणैर्विश्वमिति विजयः ॥ यतो जयति जेते सर्वभूतानि स्वभावतो जे-
ता ॥ विश्वस्यासौ योनिश्चेति विश्वयोनिः ॥ पुनः पुनः शरीरेषु वस-
ति क्षेत्रज्ञरूपेणेति पुनर्वसुः ॥५०॥ ॥५१॥ उपेन्द्रो वामनः प्रांशुरमोघः शु-
चिरूर्जितः ॥ अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥५१॥ इन्द्रमुप
गतोनुजत्वेनेत्युपेन्द्रः ॥ यद्वा उपरीन्द्रः उपेन्द्रः ॥ ममोपरि यथेन्द्रस्त्वया
पितो गोभिरीश्वरः ॥ उपेन्द्रमिति लक्ष्मी वागास्पति मुनिदेवताः इति श्रीहरि-
वंशे ॥ बलिं वामनरूपेण याचितवानिति वामनः ॥ संभजनीय इति वा ॥ म-
ध्ये मनमासीनं विश्वे देवा उपासत इति मन्त्रवर्णात् ॥ सर्वदेवमयरूपं
दर्शयामास वै प्रभुः ॥ भूः पादौ द्यौः शिरश्चास्य चन्द्रादित्यौ च चक्षुषी
त्यादि विश्वरूपं दर्शयिता ॥ तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे ॥
नभः प्रक्रममाणस्य नाभ्यां तौ समवस्थितौ ॥ इयमात्क्रममाणस्य जानु-
मूले व्यवस्थितौ इति प्रांशुत्वं दर्शयति हरिवंशे ॥ न मोघं चेष्टितं

वी॰

२१

43

यस्य सोऽमोघः ॥ स्मरतां स्तुवतां अर्चयतां पावनत्वाच्छुचिः ॥ अस्य स्पर्शश्च
महाशुचिरिति मंत्रवर्णात् ॥ बलप्रकर्षशालित्वादूर्जितः ॥ अतीत्येंद्रं स्थि
तो ज्ञानैश्वर्यादिभिः स्वभावसिद्धैरित्यतींद्रः ॥ सर्वेषां प्रतिसंहारात्संग्र
हः ॥ सर्गस्वरूपतया सर्गहेतुत्वाद्वा सर्गः ॥ एकरूपेण जन्मादिरहित
तया धृतमात्मा येन स धृतात्मा ॥६०॥ स्वेषु स्वेष्वधिकारेषु प्रजा नियम
यतीति नियमः ॥ अंतर्यच्छतीति यमः ॥१७॥ वेद्यो वैद्यः सदायोगी वीर
हा माधवो मधुः ॥ अतींद्रियो महामायो महोत्साहो महाबलः ॥१८॥
निःश्रेयसार्थिभिर्वेदनार्हत्वाद्वेद्यः ॥ विद्यानां वेदित्वाद्वैद्यः ॥ सदावि
र्भूतस्वरूपत्वात्सदायोगी ॥ धर्मत्राणायासुरवीरान्सुरमदान्हन्तीति वी
रहा ॥ मायाविद्यायाः पतिर्माधवः ॥ मायाविद्या हरेः प्रोक्ता तस्या ईशो
यतो भवान् ॥ तस्मान्माधवनामासि धवः स्वामीति शब्दित इति हरि
वंशे ॥ यथा मधु परां प्रीतिमुत्पादयति अयमपि तथेति मधुः ॥ अश
म ब्दमस्पर्शमिति श्रुतेः ॥ शब्दादिरहितत्वादिंद्रियाणामविषय इत्यती
न्द्रियः ॥ मायाविनां मायाकारत्वान्महामायः ॥ मम माया दुरत्ययेति भ
गवद्वचनात् ॥७०॥ जगदुत्पत्तिस्थितिलयार्थमुद्युक्तत्वान्महोत्साहः ॥

बलिनामपि बलित्वान्महाबलः ॥१८॥ महाबुद्धिर्महावीर्यो महाशक्तिर्म
हाद्युतिः ॥ अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥१९॥ बुद्धिम
तामपि बुद्धिमत्त्वान्महाबुद्धिः ॥ महदुत्पत्तिकारणमविद्यालक्षणं वी
र्यमस्येति महावीर्यः ॥ महती शक्तिः सामर्थ्यमस्येति महाशक्तिः ॥ मह
ती द्युतिर्बाह्याभ्यंतरा चास्येति महाद्युतिः ॥ स्वयंज्योतिःश्रुतेः ॥ ज्योति
षां ज्योतिरित्यादेश्च ॥ इदं तदिति निर्देष्टुं यन्न शक्यते परस्मै स्वसंवेद्यत्वा
दनिर्देश्यं वपुरस्येति सः अनिर्देश्यवपुः ॥ ऐश्वर्यलक्षणा समग्रा श्रीर्यस्य स
श्रीमान् ॥ सर्वैः प्राणिभिर[illegible]मेया बुद्धिरात्मा यस्य सोऽमेयात्मा ॥ महांत
मद्रिं मंदरं गोवर्धनं चामृतमथने गोरक्षणे च धृतवानिति महा
द्रिधृक् ॥१९॥८०॥ महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ॥ अनि
रुद्धः सुरानंदो गोविंदो गोविदांपतिः ॥२०॥ महानिष्वास इषुक्षेपो य
स्य स महेष्वासः ॥ एकार्णवाप्लुतां महीं बभारेति महीभर्ता ॥ यस्य वक्ष
स्यनपायिनी श्रीर्वसति स श्रीनिवासः ॥ सतां वैदिकानां पुरुषार्थसा
धनहेतुः सतां गतिः ॥ न केनापि प्रादुर्भावेषु निरुद्ध इत्यनिरुद्धः ॥
सुरानानंदयतीति सुरानंदः ॥ नष्टां वै धरणीं पूर्वमविंदं यद्गुहागतां ॥ गो
नो

विंद इति तेनाहं देवैर्वाग्भिरभिष्टुत इति मोक्षधर्मवचनाद्गोविंदः ॥ अहं
किलेंद्रो देवानां त्वं गवामिंद्रतां गतः ॥ गोविंद इति देवास्त्वां स्तोष्यंति भुवि
शाश्वतमिति ॥ गोरषात्तु यथा वाणीनां च विंदयते भवान् ॥ गोविंदस्तु ततो
देव मुनिभिः कथ्यते भवानिति चे[illegible]रिवंशे ॥ गोवाणीं तां विंदतीति गो-
विंदस्तेषां पतिर्विशेषणेति गोविदां पतिः ॥ २०॥ मरीचिर्दमनो हंसः
सुपर्णो भुजगोत्तमः ॥ हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१॥
तेजस्विनामपि तेजस्वित्वान्मरीचिः ॥ स्वाधिकारात्प्रमाद्यतीः प्रजाः द-
मयितुं शीलमस्य वैवस्वतादिरूपेणेति दमनः ॥ [illegible] ॥ हंस इति तादा-
त्म्यभावनातः संसारबंधं हंतीति हंसः ॥ पृषोदरादित्वात्साधुत्वं ॥ हंति
गच्छति सर्वशरीरेष्विति वा हंसः ॥ हंसः शुचिषदिति मंत्रवर्णात् ॥ शो-
भनपर्णत्वात्सुपर्णः ॥ छंदांसि पर्णानीति मंत्रवर्णात् ॥ भुजेन गच्छतामुत्त-
मो भुजगोत्तमः ॥ हिरण्यमिव कल्याणनाभिरस्येति हिरण्यनाभः ॥
बदरिकाश्रमे नरनारायणरूपेण परमं तपश्चरतीति सुतपाः ॥ मनसश्चेंद्रिया

२३

णांच ध्येकाग्र्य ५२ मंत्र ५ इति स्मृतेः ॥९ पद्ममिव सुवर्तुला नाभिरस्येति हृदयं पद्मस्य
नाभौ मध्ये प्रकाशमानात् पद्मनाभः ॥ पृषोदरादित्वात्साधुत्वात् प्रजानां पतिः
पिता प्रजापतिः ॥२१॥ अमृत्युः सर्वदृक्सिंहः संधाता संधिमान् स्थिरः ॥ अजो
दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥२२॥ मृत्युर्विनाशस्तद्धेतुर्वास्य न वि
द्यत इत्यमृत्युः ॥ प्राणिनां कृताकृतं सर्वं पश्यतीति स्वाभाविकेन बोधेनेति स
र्वदृक् ॥ हिनस्तीति सिंहः ॥ पृषोदरत्वात्साधुत्वात् ॥१००॥ इति नाम्नां शतं ॥
द्वितीयं विवृतं ॥ वृषाकपिः पुंडरीकयज्ञाक्षो वराहो हलो वेदविद्भ्राजिष्णुश्चैवं
हेति यमो महोत्साहो महाबलो सोऽहं सः ॥ कर्मफलेपुरुषान् संधत्ते इति संधा
ता ॥ फलभोक्ता च एवेति संधिमान् ॥ सदैकरूपत्वात्स्थिरः ॥ अजति ग
च्छति क्षिपतीति वा अजः ॥ मर्षितुं सोढुं दानवादिभिर्न शक्यत इति दुर्म
र्षणः ॥ श्रुतिस्मृत्यादिभिः सर्वेषामनुशिष्टिं करोतीति शास्ता ॥ विशेषेण
श्रुतः ॥ सत्यज्ञानादिलक्षण आत्मा तेन विश्रुतात्मा ॥ सुरारीणां निहंतृत्वात्सु
रारिहा ॥२२॥ गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ॥ निमिषोऽनि २३

47

मिषः स्रग्वी वाचस्पतिरुदारधीः ॥२३॥ सर्वविद्यानां उपदेष्टृत्वात्सर्वेषां जन
कत्वाद्वा गुरुः ॥ विरंच्यादीनामपि ब्रह्मविद्याप्रदायकत्वाद्गुरुतमः ॥ यो ब्रह्माण
[illegible]मित्यादि मंत्रवर्णात् ॥१०॥ धाम ज्योतिः ॥ नारायण परं ज्योतिरिति
मंत्रवर्णात् ॥ सर्वलोकानामास्पदत्वात् धाम ॥ परं ब्रह्म धामेति श्रुतेः ॥ स
त्यवचनलक्षणरूपत्वात् सत्यः ॥ स सत्परमेव वदतीति श्रुतेः ॥ सत्यस्य सत्यमि
ति वा ॥ प्राणा वै सत्यं तेषामेष सत्यमिति श्रुतेः ॥ सत्यः ॥ अवितथपराक्र
मो यस्य स सत्यपराक्रमः ॥ निमीलिते नेत्रे योगनिद्रारतस्यातो निमिषः ॥
नित्यप्रबुद्धस्वरूपत्वादनिमिषः ॥ भूततन्मात्ररूपा वैजयंताख्या स्रजं
नित्यं बिभर्तीति स्रग्वी ॥ वाचो विद्याया पतिर्वाचस्पतिः ॥ उदारा सर्वार्थ
विषया धीर्बुद्धिरस्य स उदारधीः ॥ वाचस्पतिरुदारधीरिति पदद्वयमेकं
नाम ॥२३॥ अग्रणीः ग्रामणीः श्रीमान्न्यायो नेता समीरणः ॥ सहस्रमू
र्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥२४॥ अग्रं प्रकृष्टं पदं नयति मुमुक्षू
न्निति अग्रणीः ॥ भूतग्रामस्य नेतृत्वाद्ग्रामणीः ॥ कांतिः सर्वातिशायिन्यस्ये
ति श्रीमान् ॥२०॥ प्रमाणानुग्राह

र्कोभेदकारत्वान्न्यायः ॥ जगद्यंत्रनिर्वाहको नेता ॥ श्वसनरूपेण
भूतानि चेष्टयतीति समीरणः ॥ सहस्राणि मूर्द्धानोऽस्येति सहस्रमूर्द्धा
विश्वस्यात्मा विश्वात्मा ॥ सहस्रशीर्षा पुरुष इति मंत्रवर्णात् ॥२४॥ आव
र्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ॥ अहः संवर्तको वह्निरनिलो धर
णीधरः ॥२५॥ आवर्तयितुं संसारचक्रं शीलमस्येत्यावर्तनः ॥ संसार
बंधनान्निवृत्त आत्मा स्वरूपमस्येति निवृत्तात्मा ॥ आच्छाद्याविद्ययाविद्य
या संवृतात्मा संवृतः ॥३०॥ सम्यक्प्रमर्दयति रुद्रकालाद्याभिर्विभूति
भिरिति संप्रमर्दनः ॥ सम्यग्गन्तृप्रवर्तनात्सूर्योऽहः संवर्तकः ॥ वहनो
ह्निः ॥ अनादीनाद्निलयत्वानिलः ॥ शेषदिग्गजादिरूपेण धरणीं
धत्ते इति धरणीधरः ॥२५॥ सुप्रसादः प्रसंनात्मा विश्वधृग्विश्वभु
ग्विभुः ॥ सत्कर्ता सत्कृतिः साधुर्जह्नुर्नारायणो नरः ॥२६॥ शोभनः
प्रसादो यस्यापकारवतामपि शिशुपालादीनां मोक्षप्रदातृत्वादि
ति सुप्रसादः ॥२ रजस्तमोभ्यामकलुषत आत्मांतःकारमस्येति प्रसन्ना २८

त्मा॥ पद्मसम्भवस्य भावः॥ कारुणिकः दइसर्पः॥ अर्वाप्पसर्वैकामत्वाद्या
विश्वं धेछातीति विश्वधृक्॥ त्रीधृपाप्रागल्भ्यै विश्वं भुङ्क्ते भुनक्ति
पालयतीति विश्वभुक्॥ हिरण्यगर्भादिरूपेण विविधः भवतीति
विभुः॥ निखिलविभुपिति मंत्रवर्णात्तु॥५॥ सत्यलोके शेते पूजयतीति
सत्कर्ता॥ पूजितैरपि पूजितः॥ पापघ्नरत्तपा साधुः॥ साधयति साध्य
मेतानुपदानोत्साध्यमात्रे साधकः॥ जनानां सरतारसमय जनकृते जनयतीति
जनकः॥ ततात्वविदुषो चेष्टान्वेययति परमितित्वा॥ नर आत्मा ततो जातान्याका
शादीनि नाराणि तानि कार्याण्ययनं कारणात्मना व्याप्नोत्यतश्च तान्यस्यायन
मिति नारायणः॥ यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा॥ अन्तर्बहि
श्च तत्सर्वं व्याप्य नारायणः स्थितः॥ इति मन्त्रवर्णात्तु॥ नराज्जातानि तत्त्वा
नि नाराणीति ततो विदुः॥ तान्येव चायनं तस्य तेन नारायणः स्मृतः॥ इति वि
स्मृतेर्वा॥ नारायणमयनं लयस्थानं यस्येति वा॥ प्रलयपयसि निस्वपितीति
श्रुतेः॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः॥ अयनं तस्य ताः पूर्वं
तेन नारायणः स्मृतः॥ इति मनुवचनात्तु॥ यानो नारायणः॥ नारायणायनेम

इत्येष परमं सत्यं संसारघोरविषसंहरणाय मंत्रः ॥ ४८ एवं तु भव्यमनयो यततयः
सुरागाद्वेषे संसारामुपरि क्षाम्यते मन्दबालन्दुरिति श्रीनारसिंहपुराणे ॥ न
पततीति नरः प्रोक्तः परमात्मा सनातन इति व्यासवचनात् ॥ २९ ॥ असंख्येयो
प्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ॥ सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धि
साधनः ॥ २७ ॥ यस्मिन्संख्या नेहादि न विद्यते इत्यसंख्येयः ॥ अप्रमेय आत्मा
स्वरूपं यस्य सोऽप्रमेयात्मा ॥ अतिशेते इति सर्वमतो विशिष्टः ॥ शिष्ट्यतः परमात्मा शासि
ति श्रुतेः ॥ कुर्वं ध्यानसमं करोतीति शिष्टकृत् ॥ शिष्टान् पालयतीति शिष्टा
मात्स्य वचनो ध्यार्विशेषवचनो हृष्टः ॥ कुरुक्षेत्रानित्यात्तरणे पद्मा तत्व कृति
वाक्षि पृष्टकृतः ॥ ५० ॥ मनरंजनः शुचिः ॥ सिद्धानिवृत्तः अर्थमानो येस्य गत
सिद्धार्थः ॥ सिद्ध कामेइति श्रुतेः ॥ सिद्धा निष्पन्नसंकल्पोस्येति
सिद्धसंकल्पः ॥ सर्वपूर्वकल्प इति श्रुतेः ॥ सिद्धि फलं कर्तृभ्यः स्वाधि
कारानुरूपतो ददातीति सिद्धिदः ॥ सिद्धेः साधकत्वात् सिद्धिसाधनः ॥ २७ ॥
वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ॥ वर्धनो वर्धमानश्च विविक्त २५

रः॥ श्रुतिसागरः॥१२८॥वृषो धर्मः पुण्यं तदेवाहः॥द्वादशाहादिः वृषाहः सोस्यास्तीति वृषाही।
वृषाहः सत्रराजाहः सखिभ्यष्टजिति टच प्रत्ययः॥वर्षत्येष भक्तेभ्यः कामानिति वृषभः॥
यास्केनोक्तं॥विष्णुर्विचक्रममाणादिति श्रुतो विष्णुः॥वृषरूपाणि सोपानपर्वाण्याहुः॥परंधा
मारुरुक्षोरित्यतो वृषपर्वा॥प्रजा वर्षति [illegible]दरं तस्येति वृषोदरः॥वर्धयतीति वर्धयनः॥
प्रपंचरूपेण वर्धत इति वर्धमानः॥एवं वर्धमानोपि प्रपंचेवतिष्ठतीति विविक्तः॥श्रु
तयः सागरस्वरूपवात्र निधीयंत इति श्रुतिसागरः॥१२८॥सुभुजो दुर्धरो वाग्मी महेंद्रो व
सुदो वसुः॥नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः॥१२९॥शोभना भुजा जगद्रक्षाक
रा अस्येति सुभुजः॥पृथिव्यादीन्यपि धारकाण्यन्यैर्धारयितुमशक्यानि धारयन्नन्येन
चिद्धारयितुं न शक्यत इति दुर्धरः॥दुःखेन ध्यानसमये मुमुक्षुभिर्हृदये धार्य
त इति वा दुर्धरः॥यतो निःसृता ब्रह्ममयी वाक् तस्माद्वाग्मी॥महांश्चासाविंद्र
श्चेति महेंद्रः॥ईश्वराणामीश्वरः॥वसु धनं ददातीति वसुदः॥अन्नादो वसुदा
न इति श्रुतेः॥दीयमानं तद्वस्त्वपि॥स एवेति वसुः॥आच्छादयत्यात्ममायये
ति वा वसुः॥अंतरिक्ष एव वसति नान्यत्रेत्यसाधारणेन वसुनेनया वायुर्व
सुः॥वसुरंतरिक्षसदिति श्रुतेः॥७०॥एकरूपेन विद्यत इति नैकरूपः॥अने
कुरूपमिसर्वं॥इंद्रो मायाभिः पुरुरूप ईयत इति श्रुतेः॥ज्योतींषि विष्णुरिंस्रनेश्च॥
त्यादि।

ब्रह्मा सा हि रूपस्येति ब्रह्मरूपः ॥ शिपिः पशवस्तेषु प्रतिविनिष्ट तिय ज्ञरूपेण निशि
पिविष्टः ॥ यज्ञो वै विष्णुः पशवः शिपिर्यज्ञः एव पशुषु प्रतिष्ठतीति श्रुतेः ॥ शिपियो
रश्मयः रश्मिषु निविष्ट इति वा ॥ श्रीसाध्ययन योगाच्च शीपि वा रिमं चक्षते ॥
तत्पानाद्दक्षिणश्चैव शिपयो रश्मयो मता ॥ तेषु प्रवेशाद्धि स्येशूलः शिपिविष्ट इत्यो
च्यते ॥ सर्वेषां प्रकाशानं श्रील लक्ष्मीकाशनः ॥२९॥ ओजस्तेजोद्युतिधरः प्रकाशा
त्मा प्रतापनः ॥ ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥३०॥ ओजः प्राण
बलं तेजः शौर्यादयो गुणाः द्युतिर्दीप्तिस्तां धारयतीति ओजस्तेजोद्युतिधरः ॥ ओजस्ते
ज इति नामद्वयं वा ॥ बलं बलवतां चाहं ॥ तेजस्तेजस्विनामहमिति भगवद्वचनात्
ज्ञानलक्षणां दीप्तिं धारयतीति द्युतिधरः ॥ प्रकाशस्वरूपं प्रकाशात्मा ॥ सवित्रादिभि
र्विश्वं प्रतापयतीति प्रतापनः ॥ धर्मज्ञानवैराग्यादिभिरुपेतत्वात् ऋद्धः ॥ स्पष्टमु
दात्तमोंकारलक्षणमक्षरमस्येति स्पष्टाक्षरः ॥ ऋग्यजुःसामलक्षणो मन्त्रः ॥
मन्त्रबोध्यत्वाद्वा मन्त्रः ॥८०॥ तापत्रयार्कसन्तप्तानां चन्द्रांशुरिवाह्लादकरत्वाच्च
न्द्रांशुः ॥ भास्करद्युतिसाधर्म्याद्भास्करद्युतिः ॥३०॥ अमृतांशूद्भवो भानुः शश
बिन्दुः सुरेश्वरः ॥ ॥ औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥३१॥ अमृतांशूद्भवः
अमृतं मध्यमानेन नस्याब्धेर्यस्मात् सोमः तांशुरुद्भवः ॥ भातीति भानुः ॥ तमेव भान्तमनि
त्यादिश्रुतेश्च ॥ शशाङ्कवद्बिन्दुलाञ्छनमस्येति शशबिन्दुश्चन्द्रः ॥ पुष्णामि चौषधीः २६

53

सर्वः सोमो भूत्वा रसात्मकः इति भगवद्वचनं ॥ सुराणां देवानां शोभनदातॄणां चेश्वरः ॥ सं
सार रोग भेषजत्वादौषधं ॥ जगतां सेतुत्तारणहेतुत्वाद्भेदकारणाद्वा सेतुवद्वर्णाश्र
मादीना इति जगतः सेतुः ॥ स एष सेतुर्विधरण एषां लोकानामसंभेदायेति श्रुतेः ॥ स
त्या अवितथा धर्मज्ञानादयो गुणाः पराक्रमश्च यस्य स सत्यधर्मपराक्रमः ॥३०॥
भूतभव्यभवन्नाथः पवनः पावनोऽनलः ॥ कामहा कामकृत्कान्तः कामः कामप्रदः
प्रभुः ॥३१॥ भूतभव्यभवन्नाथः भूतभव्यभवतां भूतग्रामाणां नाथस्तैर्याच्यमवानु
पतयति तेषामीष्टे शास्तीति वा भूतभव्यभवन्नाथः ॥१०॥ पवत इति पवनः ॥ पव
नः पवतामस्मीति भगवद्वचनात् ॥ पावयतीति पावनः ॥ भीषास्माद्वातः पवत
इति श्रुतेः ॥ अन्नान्प्राणानात्मत्वेन लातीति जीवोऽनलः ॥ अनाल्लातीति लतेऽगं
धकाचिनो नत्रपूर्वाह्य ॥ अगंधमरसमिति श्रुतेः ॥ अलं पर्याप्तमस्य न विद्यत
इति वा ॥ अनिसन ननलोके पानलः ॥ कामान्हति मुमुक्षूणां भक्तानामिति कामहृ
ला ॥ कामिकानां कामान्करोतीति कामकृत् ॥ कामहल्लस्य तत्र न कर्ता ह्य ॥ अभि
रूपतमः कान्तः ॥ काम्यते पुरुषार्थाभिकांक्षिभिरिति कामः ॥ भक्तेभ्यः कामान्
प्रकर्षेण ददातीति कामप्रदः ॥ प्रकर्षेण भवनात्प्रभुः ॥३२॥ युगादिकृद्युगावर्तो
नैकमायो महाशनः ॥ अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् ॥३३॥

२८

युगादेः कालभेदस्य कर्तृत्वाद्युगादिकृत् ॥ युगानामारंभकृदिति वा ॥ ३०० ॥ इति नाम्नां तृतीयशतं विवृतं ॥ संधाता धाम न्यायः संप्रमर्दनः ॥ सत्कर्ता शुचिर्वर्धमानो नैकरूपश्चंद्रांशुः पवनः ॥ युगानि कृतादीनि वर्तयतीति युगावर्तः ॥ १ एका माया न विद्यते बह्वीर्माया वहतीति नैकमायः ॥ नलोपोऽत्र इति नकारलोपो भवति ॥ प्रकारानुबंधरहितस्यापि नकारस्य प्रतिषेधवाचिनोऽविद्यमानत्वं ॥ महदशनमस्येति महाशनः ॥ सर्वेषां बुद्धीन्द्रियाणां अगम्यः अदृश्यः ॥ स्थूलरूपेण व्यक्तं स्वरूपमस्येति व्यक्तरूपः ॥ स्वयंप्रकाशत्वाद्योगिनां व्यक्तस्वरूप इति वा व्यक्तरूपः ॥ सहस्राणि असुराणां युद्धक्रीडादिना जयतीति सहस्रजित् ॥ सर्वाणि भूतानि युद्धक्रीडादिषु सर्वत्राचिन्त्यशक्तितया जयतीति अनंतजित् ॥ ३३ ॥ इष्टो विशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः ॥ क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ३४ ॥ परमानंदत्वेन प्रियो यज्ञेन पूजनं इति वा इष्टः सर्वेषामंतर्यामित्वेन विशिष्टः ॥ शिष्टानां विदुषामिष्टः शिष्टेष्टः ॥ शिष्टा इष्टा अस्येति वा ॥ प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इति भगवद्वचनात् ॥ शिष्टैरिष्ट इति वा शिष्टेष्टः ॥ १० ॥ शिखंडः कलापोऽलंकारत्वेन अस्येति शिखंडी गोपवेषधरः ॥ यतो नह्यति भूतानि मायया अतो नहुषः ॥ कामानां वर्षणाद्वृषो धर्मः ॥ वृषो हि भगवान्धर्मः स्मृ २८

55

तोलोकेषु भारत ॥ नैघंटुकपदाख्यातैर्विद्धि मां वृषभमस्कन्नेति महाभारते ॥ साधुर्मो
क्षौधर्महेतोति क्षौधर्म ॥ असाधुपु क्षौधर्मं करोतीति क्षौधर्मकृत् ॥ क्रियत इति कर्म ।
गतस्य कृतौ ॥ एते बापुरुषां ॥ सकृती यस्य चेतत्कर्म सर्वे वेदितुं पइति श्रुतेः ॥
क्षौधर्मकृतो दैत्यादीनां कर्तृत्वे एक एव यानाम क्षौधर्मकृत् ॥ विश्वेषा मालबेन
त्वेन विश्वेषां बाहवोस्येति विश्वबाहोर्वास्येति वा विश्वबाहुः ॥ विश्वतो बाहुरिति
श्रुतेः ॥ महीं पूजां धरणीं वा धत्त इति महीधरः ॥३४॥ अच्युतः प्रथितः प्राणः प्रा
णदो वासवानुजः ॥ अपांनिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥३५॥ षड्भावविका
ररहितत्वादच्युतः ॥ शाश्वतं शिवमच्युतमिति श्रुतेः ॥ जगदुत्पत्त्यादिकर्मभिः
प्रख्यातः प्रथितः ॥ सूत्रात्मना प्रजाः प्राणयतीति प्राणः ॥ प्राणो वा अहमस्मीति बह्वृ
चाः ॥ वायुर्वै गौतम तत्सूत्रमिति श्रुतेः ॥२०॥ सुराणामसुराणां च प्राणबलं ददा
तीति प्राणदः ॥ आदित्यां कश्यपाद्वासवस्यानुजो जात इति वासवानुजः ॥ आ
पो यत्र निधीयन्ते सोपांनिधिः ॥ सरसामस्मि सागरः इति भगवद्वचनं ॥ अ
धितिष्ठति भूतानि उपादानकारणत्वेन ब्रह्म तदधिष्ठानं ॥ मत्स्थानि सर्व
भूतानि इति भगवद्वचनात् ॥ अधिकारिभ्यः कर्मानुरूपं फलं प्रयच्छन्ने
प्रयाच्यतीत्यप्रमत्तः ॥ स्वे महिम्नि स्थितः प्रतिष्ठितः ॥ स भगवः कस्मिन्

देवः सुरशत्रूणां पुराणां दारणात्स पुरंदरः ॥ वाचंयमपुरंदरो चेति नमत्पाणिनि नि-
पातनात् ॥३६॥ अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥ अनुकूलः शतावर्तः
पद्मी पद्मनिभेक्षणः ॥३७॥ शोकादिषडूर्मिवर्जितोऽशोकः ॥ संसारसागरात्तार-
यतीति तारणः ॥ गर्भजन्मजरामृत्युलक्षणाद्भयात्तारयंस्तारः ॥ शूरो वि-
क्रमवत्तया ॥ शूरकुलोद्भवत्वाच्छौरिः ॥ नालिस्यां प्रातिकूल्यस्य स्वयमा चरति
धर्मत्राणाय शतमावर्तनानि प्रादुर्भावा अस्येति शतावर्तः ॥ यद्वा नाडीशते प्रा-
णरूपेण वर्तत इति वा ॥ पद्मं हस्ते विद्यत इति पद्मी ॥ पद्मनिभेक्षणे दृशौ वा-
स्येति पद्मनिभेक्षणः ॥३७॥ पद्मनाभोऽरविंदाक्षः पद्मगर्भः शरीरभृत् ॥ मह-
र्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥३८॥ पद्मस्य नाभौ मध्ये कर्णिकायां स्थि-
त इति पद्मनाभः ॥ अरविंद[illegible]त्वादरविंदाक्षः ॥ पद्मस्य हृदयारण्यस्य म-
ध्ये उपास्यत्वात्पद्मगर्भः ॥ पोषयन्नन्नरूपेण प्राणरूपेण वा शरीरिणां शरीराणि
धारयञ्छरीरभृत् ॥ स्वमायया शरीराणि बिभर्तीति वा ॥ महती ऋद्धिर्विभू-
रस्येति महर्द्धिः ॥४०॥ प्रपञ्चरूपेण ऋद्धः ॥ वृद्धः पुरातन आत्मास्येति वा वृद्धात्मा
महती अक्षिणी महांत्यक्षाणि वास्येति महाक्षः ॥ गरुडाङ्को ध्वजोऽस्येति गरुडध्वजः ॥३८॥

57

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ॥ सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिं
जयः ॥३९॥ तुला उपमानमस्य न विद्यत इत्यतुलः ॥ न तस्य प्रतिमास्ति यस्य नाम
महद्यशः इति श्रुतेः ॥ न त्वत्समोस्त्यभ्यधिकः कुतोन्यः इति स्मृतेश्च ॥ शरीरा
णि शीर्यमाणत्वात् तेषु प्रत्यगात्मतया भातीति शरभः ॥ बिभेत्यस्मात्सर्वमिति भी
मः ॥ भीमादपादाने इति पंचमी ॥ सन्मार्गवर्तिनाम भीमो वा ॥ समयं मरणं नाम
योगं जानातीति सृष्टिस्थित्यंतकालवित् ॥ षट्समयान् जानातीति वा समयज्ञः ॥ स
र्वभूतेषु समत्वं यजनमस्येति वा ॥ समत्वमाराधनमच्युतस्येति प्रल्हादवचनं ग
यज्ञेषु हविर्भागं हरतीति हविर्हरिः ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चे
ति भगवद्वचनात् ॥ अथवा हूयत इति हविः ॥ अवधूं पुरुषं पशुमिति हविषि श्रू
यते ॥ स्मृतिमात्रेण पुंसां पापं हरतीति हरिर्हरिद्वर्णत्वाद्वा हरिः ॥ हराम्यघं हि स्मर्तॄ
णां हविर्भागं क्रतुष्वहं ॥ वर्णश्च मे हरिः श्रेष्ठस्तस्माद्धरिरहं स्मृतः इति व्यासव
चनात् ॥ सर्वैर्लक्षणैः प्रमाणैर्लक्षणं ज्ञानं जायते यत् तद्धि निर्दिष्टं सर्वलक्षणल
क्षणं तत्र साधुः सर्वलक्षणलक्षण्यः ॥ तस्यैव परमार्थत्वात् ॥६०॥ लक्ष्मी
र्यस्य वक्षसि नित्यं वसतीति लक्ष्मीवान् ॥ समितिं युद्धं जयतीति समितिंजयः
॥३९॥ विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ॥ महीधरो महाभागो वेगवानमि

२९

58

नाशनः ॥४०॥ विगतः क्षरो नाशो यस्य सो विक्षरः ॥ स्वछंदतया रोही
तां मूर्त्तिं मत्स्यमूर्त्तिं वा वहन् रोहितः ॥ मुमुक्षुभिस्तं देवं मार्गयंत इति मार्गः ॥ पर
मानंदेन प्राप्यते स मार्ग इति वा ॥ उपादानं निमित्तं च स एवेति हेतुः ॥ दमादि
साधनेनोदरा उत्कृष्टमतिर्यातया गम्यत इति दामोदरः ॥ दमाद्दामोदरं विदुरि
ति महाभारते ॥ यशोदया दाम्नोदरे बद्ध इति वा ॥ तयो मध्यगतं बद्धं दाम्ना गा
ढं तथोदरे ॥ ततश्च दामोदरतां स ययौ दामबंधनादिति ब्रह्मपुराणे ॥ दामानि
लोकनामानि तानि यस्योदरांतरे ॥ तेन दामोदरो देवः श्रीधरः समाश्रितः ॥
इति व्यासवचनाद्वा दामोदरः ॥ सर्वानभिभवति क्षमत इति वा सहः ॥ महीं गि
रिरूपेण धत्त इति महीधरः ॥ वनानि विष्णुर्गिरयो दिशश्चेति पराशरोक्तेः
महानुभागो भाग्यमस्यावतारेष्विति महाभागः ॥७०॥ वेगो जवस्तद्वान्वे
गवान् ॥ अनेजदेकं मनसो जवीय इति श्रुतेः ॥ संहारसमये विश्वमश्नाति
इत्यमिताशनः ॥४०॥ उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ॥ कर
णं कारणं कर्ता विकर्ता गहनो गुहः ॥४१॥ प्रपंचोत्पत्त्युपादानकारण
त्वादुद्भवः ॥ उद्गतो भवात्संसारादिति वा ॥ सर्गकाले प्रकृतिं पुरुषं च क्षोभ

३०

यामासेतिक्षोभणः।।प्रकृतिंपुरुषंचैवप्रविश्यात्मेच्छयाहरिः।।क्षोभया
मासभगवान्सर्वकालेव्ययाविति।विष्णुपुराणे।।यतोदीव्यतिक्रिड
तीसर्गादिभिर्विजिगीषतेसुराद्दनून्व्यवहरतिसर्वभूतेष्वात्मतयाद्यो व३
ततेस्तूयतेस्तुत्यैःसर्वत्रगच्छतितस्माद्देवः।।एकोदेवइतिमंत्रवर्णा
त्।।श्रीर्विभूतिर्यस्योदरेंतेजगद्रूपास्थितासश्रीगर्भः।।परमश्चा
सावीशनशीलश्चेतिपरमेश्वरः।।समंसर्वेषुभूतेषुतिष्ठंतंप
रमेश्वरमितिभगवद्वचनात्।।साधकतमंकरणं।।जगदुत्पत्तौ
कारणमुपादानंनिमित्तंच।।कर्त्तास्वतंत्रः।।८०।।विचित्रंभवनं
रुतेवाविचित्रंविकर्त्ता।।तत्स्वरूपंसामर्थ्यंचेष्टितंवातस्यज्ञातुंनशक्य
तइतिगहनः।।गूहतेसंवृणोतिस्वरूपादिनिमायेतिगुहः।।४१।।व्य
वसायोव्यवस्थानःसंस्थानःस्थानदोध्रुवः।।परर्द्धिःपरमःस्पष्टः
तुष्टःपुष्टःशुभेक्षणः।।४२।।संविन्मात्रस्वरूपत्वाद्व्यवसायः।। ३०

60

यस्मिन् व्यवस्थितिः सर्वस्येति व्यवस्थानः ॥६॥ सलुलुपुणो बहल
स्महणालेतरि लुलुपुटे ॥ यत्र भूतानां संस्थितिः प्रलयात्मिका समी
चीनं स्थानमस्येति वा संस्थानः ॥७॥ प्राणिनां कर्मानुरूपस्थानं द
दातीति स्थानदः ॥ अविनाशित्वाद्ध्रुवः ॥ परऋद्धिर्विभूतिरस्ये
ति परर्द्धिः ॥ अनन्यादानसंसिद्धित्वात्स्वविदालनतया परमः स्पष्टः
१०॥ परमानंदैकरूपत्वात्तुष्टः ॥ सर्वसंपूर्णत्वात्पुष्टः ॥ ईक्षणं
दर्शनं यस्य शुभं शुभकरं मुमुक्षूणां मोक्षदं भोगार्थिनां भोग
दं ॥ संदेहविच्छेदकारणं हृदयंगमं धर्मविच्छेदकरं सर्वकर्मणां
क्षपणमविद्याया अनिवर्तकं स शुभेक्षणः ॥ भिद्यते हृदय
ग्रंथिरित्यादिस्मृतेः ॥१४२॥ रामो विरामो वि[illegible]जो मार्गो नेयो न
योनयः ॥ वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥४३॥
नित्यानंदलक्षणेस्मिन्योगिनो रमंत इति रामः ॥ रमंते योगिनो

३१

न्तेनोनंते सानंदचिदात्मनि॥ इति रामपदेनैतत्परं ब्रह्माभिधीयते इ
ति पद्मपुराणे॥ स्वेच्छया पावपुर्धृतं दाशरथी रामः॥ विरामं अवसा
नं प्राणिनां यस्मिन्निति विरामः॥ विगतं रजो यस्य विषयसेवायां
स विरजः॥ यं विदित्वामृतत्वाय कल्पते मुमुक्षवः॥ स एव पंथाः मा
र्गः॥ नान्यः पंथा विद्यतेऽयनायेति श्रुतेः॥ मार्गेण सम्यग्ज्ञानेन
जीवः परमात्मानं नीयत इति नेयः॥ नयतीति नयो नेता मार्गो न
यो नयति त्रिरूपः कल्पते॥ नास्य नेता विद्यते इत्यनयः॥ १००
इति नाम्नां शतं चतुर्थं विवृतं॥ गुणावर्तः क्षितिखंडी प्राणदेवालनोऽन्त
नेभारकंठे लक्ष्मीवान्चेगवान्विकृतौ स्तुषः॥ विक्रमशालित्वाद्वी
रः॥ शक्तिमतां विरंच्यादीनामपि शक्तिमत्वाच्छक्तिमतां श्रे
ष्ठः॥ सर्वभूतानां धारणात्तु धर्मः॥ अणुरेष धर्म इति श्रुतेः॥ ध
र्मै राराध्यत इति वा॥ श्रुतयः स्मृतयश्च यस्याज्ञाः॥ स एव सर्व ३१
धर्मविदामुत्तम इति धर्मविदुत्तमः॥ १०३॥ वैकुंठः पुरुषः प्राणः

62

प्राणदः प्रणवः पृथुः ॥ हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥४४॥
विषयाकुंठा गतेः प्रतिहतिः विकुंठा विकुंठायाः कर्तेति वैकुंठः ॥ ज
गतां [illegible] तानि परस्परं संश्लेषयंस्तेषां गतिं प्रतिबंधा
दिति ॥ मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना वायुश्च तेज
सा सार्धं वैकुंठत्वेन नाम मे इति शांतिपर्वणि ॥ सर्वस्मात्पुरा सदना
त्सर्वपापस्य सादनाद्वा पुरुषः ॥ स यत्पूर्वोस्मात्सर्वस्मात्सर्वान्पाप्म
न औषत्तस्मात्पुरुष इति श्रुतेः ॥ पुरिशयनाद्वा पुरुषः ॥ स वा अयं
पुरुषः सर्वासु पूर्षु पुरिशय इति श्रुतेः ॥ प्राणितीति क्षेत्रज्ञरूपे
ण प्राणानां चेष्टयन्वा प्राणः ॥ चेष्टां करोतीति श्वसनरूपेण
तिष्ठन्पुराणो ॥ [illegible] प्राणिनाम्प्राणान्प्रलये पाद्यतीति प्राण
दः ॥ प्रणौतीति प्रणवः ॥ तस्मादोमिति प्रणौतीति श्रुतेः ॥ प्रण
म्यत इति वा प्रणवः ॥ प्रणमन्तीह यं वेदास्तस्मात्प्रणव उच्यते इति
सनत्कुमारवचनात् ॥ प्रपंचरूपेण विस्तृतत्वात्पृथुः ॥४०॥ हिर
ण्यगर्भः समूर्तिकारणं हिरण्मयमण्डं यद्वीर्यं संभूतं तस्य गर्भः

63

हिरण्यगर्भः ॥ त्रिदशशत्रून् हन्तीति शत्रुघ्नः ॥ कारणत्वेन
सर्वकार्याणां व्याप्तत्वाद्व्याप्तः ॥ वाति गंधं करोतीति वायुः ॥
पुण्यो गंधः पृथिव्यां चेति भगवद्वचनात् ॥ अधो न क्षीयते जातु यस्मा
त्तस्मादधोक्षजः इत्युद्योगपर्वणि ॥ द्यौरक्षं पृथिवी चाधस्तयोर्यस्मा
दजायत मध्ये वैराजरूपेणेति वाधोक्षजः ॥ ४४ ॥ ऋतुः सुदर्शनः
कालः परमेष्ठी परिग्रहः ॥ उग्रः संवत्सरो दक्षो विश्रामो विश्वद
क्षिणः ॥ ४५ ॥ कालात्मा ऋतुशब्देन लक्ष्यत इत्यृतुः ॥ शोभनं निर्वा
णफलं दर्शनं ज्ञानमस्येति अस्माद्धेति सुदर्शनः ॥ शोभने पक्ष्मणी पद्मपत्रा
यते अस्येति वा स्वेच्छया सुदर्शनं वहतीति सुदर्शनः दृश्यते तेन त्वेरितवा
सुदर्शनः ॥ कलयति सर्वमिति कालः ॥ कालः कलयतामहमिति भ
गवद्वचनात् ॥ परमे प्रकृष्टे स्वे महिम्नि हृदयाकाशे स्थातुं शील
मस्येति परमेष्ठी ॥ परमेष्ठी विभाजते [illegible] वणानि गच्छार णार्थिभिः
परितो गृह्यते सर्वगतत्वात् परितो ज्ञायत इति वा ॥ पत्रपुष्पादिकं भक्तै
रपि तं परिग्रहणातीति वा परिग्रहः

३२

64

॥ [illegible] ॥२०॥ सूर्यादीनां मप्रियय हेतुत्वादुग्रः ॥ भीषास्माद्वातः पवते इ
ति श्रुतेः ॥ संवसन्ति भूतानि यस्मिन्निति संवत्सरः ॥ जगद्रूपेण वर्ध
मानत्वात्सर्वकर्माणि प्रकरोतीति वा [illegible] ॥ संसारसागरे क्षुत्पिपा
सादिषडूर्मिभिस्तरंगिते अविद्यायां मग्नानां कृपया महता दिव्यरूपके
[illegible] वशीकृतानां चित्तानि कांक्षमाणानां [illegible] अमृतं मोक्षं करोतीति [illegible]
[illegible] ॥ विश्वस्माद्दक्षिणः ॥ [illegible] पुरुषमस्पृदा [illegible] व्याप्तत्वाच्च
स्थावरः [illegible] ॥४५॥ विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययं ॥ अर्थोऽनर्थो महा
कोशो महाभोगो महाधनः ॥४६॥ विस्तीर्यन्ते समस्तानि जगन्ति यस्मि
न्निति विस्तारः ॥ स्थितिशीलत्वात्स्थावरः ॥ स्थितिशीलानि पृथि
व्यादीनि तिष्ठन्त्यस्मिन्निति स्थाणुः ॥ स्थावरश्चासौ स्थाणुश्चे
ति स्थावरस्थाणुः ॥ संविदात्मना प्रमाणं ॥ प्रत्यक्षादिप्रमाणं वा
अन्यथाभावव्यतिरेकेण कारणमिति बीजमव्ययं ॥ सुखरूप
त्वात्सर्वैरर्थ्यमानत्वादर्थः ॥ [illegible] विद्यते प्रयोजनमाप्तकामत्वा

65

33

दस्येयनर्घः॥ महांतः कोशा अन्नमयादयः छादका अस्येति महाको
शः॥ महाभोगः सुखरूपोस्येति महाभोगः॥ महाधनो भोगसाधनलक्षणं
धनमस्येति महाधनः॥ ७६॥ अनिर्विण्णः स्थविष्ठोभूर्धर्मयूपो महा
मखः॥ नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः॥ ७७॥ अवाप्तस
र्वकामत्वान्निर्वेदोस्य न विद्यत इत्यनिर्विण्णः॥ वैराजरूपेण स्थितः स्थ
विष्ठः॥ अग्निर्मूर्धा चक्षुषी चंद्रसूर्यौ इति श्रुतेः॥ अथ वा भवतीति भूः
सत्तासंपदादित्वाद्भवतेः क्विपू महि वा॥ यूपे पशुवत्तस्मिन्नाराधनात्मका
धर्मास्तत्र बध्यंत इति धर्मयूपः॥ महाः यस्मिन्नर्पिता मखा यज्ञा निर्वा
णलक्षणं फलं प्रयच्छंतो महांतो जायंते स महामखः॥ नक्षत्रतारकैः सार्धं
चंद्ररूपाद यो गगनः॥ वायुपाशमयैर्वर्षैर्निबद्धा ध्रुवसंज्ञितेः॥ स
ज्योतिषां चक्रमामयंस्तारामयस्य शिशुमारस्य पुच्छदेशे व्यवस्थितो 33
ध्रुवः॥ तस्य शिशुमारस्य ज्योतिश्चक्रस्य नेमिवद्वर्तमानस्य हृदये वि
ष्णुरिति कथितो नक्षत्रनेमिः॥ शिशुमारवर्णने विष्णुर्हृदयामितिस्था

ध्याय ब्राह्मणे श्रूयते ॥४७॥ चन्द्ररूपेण नक्षत्री ॥ नक्षत्राणामहं शशी
ति भगवद्वचनात् ॥ सर्वकार्येषु समर्थः ॥ क्षमते इति वा क्षमः ॥ क्षमया पृथि
वीसम इति वा लक्ष्मीः कोवयत्नात् ॥ सर्वविकारेषु क्षपितेषु त्वात्मनावस्थित
इति क्षामः ॥ क्षामो मत्वनिष्ठा ॥ नकारस्य मकारादेशः ॥ सृष्ट्यादि
सम्यगीहते इति समीहनः ॥४८॥ यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं स
तां गतिः ॥ सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमं ॥४९॥ सर्वयज्ञ
स्वरूपत्वाद्यज्ञः ॥ यज्ञो वै विष्णुरिति श्रुतेः ॥ यष्टव्योऽयमेवेति इज्यः
ये यजंति मखैः पुण्यैर्देवतादिमितं नरा ॥ आत्मानमात्मना नित्यं विष्णु
मेव यजंति ते ॥ इति हरिवंशे ॥ सर्वासु देवतासु यष्टव्यासु प्रकर्षेणो
यमेव यष्टव्यो मोक्षफलदातृत्वादिति महेज्यः ॥ यूपसहितो यज्ञः क्र
तुः ॥ आसनोपायि चोदनालक्षणं सत्रं ॥ सतस्त्रायत इति वा ॥ सतां
मुमुक्षूणां नान्या गतिरिति सतां गतिः ॥५०॥ सर्वेषां प्राणिनां कृतं स
र्वं पश्यतीति स्वाभाविकबोधेनेति सर्वदर्शी ॥ स्वभावेन विमुक्तात्मा

67

३४

सा वात्मा चेति विमुक्तात्मा ॥ विमुक्तश्च विमुच्यत इति श्रुतेः ॥ सर्वश्चासौ
ज्ञश्चेति सर्वज्ञः ॥ इदं सर्वं यदयमात्मेति श्रुतेः ॥ ज्ञानमुत्तममिति तस्य विशेष
णमेकं नाम ॥ ज्ञानं प्रकृष्टमजन्यानवच्छिन्नं सर्वस्य साधकतममिति ॥ ज्ञा
नं चोत्तमं ब्रह्म ॥ सत्यं ज्ञानमिति श्रुतेः ॥ ४८ ॥ सुव्रतः सुमुखः सूक्ष्मः सुघोषः
सुखदः सुहृत् ॥ मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ४९ ॥ शोभनं व्र
तमस्येति सुव्रतः ॥ सकृदेव प्रपन्नाय तवास्मीति च याचते ॥ अभयं सर्व
भूतेभ्यो ददाम्येतद्व्रतं ममेति रामायणे श्रीरामवचनं ॥ शोभनं मुखमस्ये
ति सुमुखः ॥ प्रसन्नवदनं चारुपद्मपत्रायतेक्षणं इति श्रीविष्णुपुराणे ॥
वनवासे सुमुखत्वाद्दाशरथी रामः सुमुखः ॥ स पितुर्वचनं श्रीमान
भिषेकात्परं प्रियं ॥ मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान् ॥ ॥ इमा
नि तु महारण्ये विहृत्य नव पंच च ॥ वर्षाणि परमप्रीतः स्थास्यामि व
चने तव ॥ रा ॥ न वनं गन्तुकामस्य त्यजतश्च वसुंधरां ॥ सर्वलोकातिग ३४
स्येव मनो रामस्य विव्यथे इति श्रीरामायणे ॥ आरतेश्चास्य सर्वविषयोपद
शनवात्सुमुखः ॥ याब्रह्मणामिहादिरिति श्रुतेः ॥ शब्दादिस्थूलत्वकार

68

ण रक्षति तस्माच्छद्वादयो ह्याकाशादीनामुत्तरोत्तरस्थूलत्वकारणानि तदभावा
त्सूक्ष्मः॥ सर्वगतं सूक्ष्ममिति श्रुतेः॥ सुघोषो मनोघोषो वेदात्मको स्येति मेघगंभी
रघोषत्वाच्चैव सुघोषः॥ सद्वृत्तानां सुखं ददाति असद्वृत्तानां सुखं द्यतीति
वा सुखदः॥ प्रत्युपकारनीरपेक्षेनयोपकारित्वात्सुहृत्॥४८॥ निरतिशा
यानंदरूपत्वान्मनो हरतीति मनोहरः॥ यो वै भूमा तत्सुखं नाल्पे सुख
मस्तीति श्रुतेः॥ क्रोधो येन जितः स जितक्रोधः॥ सुरारीन्हंति वेदमर्यादा
स्थापनार्थं न तु कोपवशादिति॥ सततत्रिदशशत्रून्निघ्नंश्च वेदमर्यादास्था
पयन्विक्रमशालिनो बाहवो स्येति वीरबाहुः॥ अधार्मिकान्विदारय
न्विदारणः॥४९॥ स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्॥
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः॥५०॥ प्राणिनः स्वापन्नाया
त्मसंबोधविधुरान्मायया कुर्वन्स्वापनः॥ स्वतंत्रः स्ववशः॥ आकाशव
त्सर्वगतश्च नित्य इति श्रुतेः॥ कारणत्वेन सर्वकार्याणां व्यापनाद्व्यापी॥
जगदुत्पत्त्यादि अनेकरूपाणि निमित्तविभूतिभिरनेकधा तिष्ठन्नैकात्मा॥

३५

जगदुत्पत्तिसंपत्तिविपत्तिकर्माणि करोतीति नैककर्मकृत् ॥ वसंत्यत्रा-
खिलमिति वत्सरः ॥८०॥ अत एव स्नेहित्वाद्वत्सलः ॥ वत्सा पृथाभ्यां त्लेचेद
सित्ल च प्रसवः ॥ वत्सानां पालनाद्वत्सी ॥ जगत्पितुः सर्वस्य वत्सभूताः प्र-
जाः इति वत्सी ॥ रत्नानि गर्भभूतान्यस्येति समुद्रो रत्नगर्भः ॥ धना-
मीश्वरो धनेश्वरः ॥५०॥ धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरम-
क्षरं ॥ अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥५१॥ धर्मगो-
पायतीति धर्मगुप् ॥ धर्मसंस्थापनार्थाय संभवामीति भगवद्वचनात् ॥ अध-
र्मो धर्मविहीनो विधर्ममर्यादास्थापनार्थं धर्ममेव करोतीति धर्मकृत् ॥
धर्मान्धारयतीति धर्मी ॥ अवितथं परं ब्रह्म सत् ॥ सदेव सोम्येदम आसीदि-
ति श्रुतेः ॥ अपरं ब्रह्म असत् ॥ वाचारंभणं विकारो नामधेयमिति श्रुतेः ॥
सर्वाणि भूतानि क्षरं ॥८०॥ कूटस्थोऽक्षरः ॥ क्षरः सर्वाणि भूतानि कू- ३५
टस्थोऽक्षर उच्यते इति भगवद्वचनात् ॥ आत्मनि कर्तृत्वादिज्ञानं कल्प-

त्मेति तद्वासनाकुंठितो जीवो विज्ञाता ॥ अनादिसादिगता अंशावोस्यैवसय
मेय मुख्यः स्वरूस्यांशः ॥ येन सूर्यस्तपति तेन सेऽरुरति श्रुतेः ॥ पद्मादिसा
तं तेजोऽस्मादिस्य ते श्रुः ॥ विशेषेण शेषादिगजं भूधरा ऽ सर्वं भूतानि या
दृधातीति विधाता ॥ निखिलनिष्पंन चैतन्यरूपत्वोत्कृतलक्षणः ॥ कृ
तानि लक्षणानि शास्त्राण्यनेनेति वा ॥ वेदाः शास्त्राणि विज्ञानमेत
त्सर्वं जनार्दनात् इति अत्रैव वक्ष्यति ॥ सजातीयविजातीयव्यवच्छेद
लक्षणो सर्वभावानां कृत मनेनेति वा ॥ आत्मनः अव्यवलक्षणं वे
क्षसितेन कृतमिति वा कृतलक्षणः ॥ ५१ ॥ गभस्तिनेमिः सत्वस्थः
सिंहो भूतमहेश्वरः ॥ आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ५२ ॥
गभस्तिचक्रस्य मध्ये सूर्यात्मनास्थित इति गभस्तिनेमिः ॥ सत्वगुण
प्रकाशप्राधान्येनाधितिष्ठतीति ॥ सर्वप्राणिषु तिष्ठतीति वा सत्वस्थः ॥
विक्रमशालित्वात् सिंहवत्सिंहः ॥ नन्दकुलोत्पन्न सतस भामा भामेति व
द्वान्नृसिंहः ॥ भूतानां महानीश्वरो भूतेन सत्येन सत्येवपरमो महानी

71

श्वर इति वा भूतमहेश्वरः ।। सर्वभूतानां न्यादीयंते नेनेति आदिः आ
दिश्चासौ देवश्चेत्यादिदेवः ।।९०।। सर्वान्भावान्परित्यज्यात्मज्ञानयो
गैश्वर्ये महति महीयते तस्मादुच्यते महादेवः ।। प्राधान्येन देवाना
मीशो देवेशः ।। देवान्बिभर्तीति देवभृत्तस्यापि शास्तेति
देवभृद्गुरुः ।। देवानां भरणात्सर्वविद्यानां भरणाद्वा देवभृद्गुरुः ।।
पर ।। उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।। शरीरभूतभृद्भो
क्ता कपींद्रो भूरिदक्षिणः ।।९३।। जन्मसंसारसागरादुत्तरतीत्युत्
तरः ।। सर्वोत्कृष्ट इति वा ।। विश्वस्मादिंद्र उत्तर इति श्रुतेः ।। गवां पालना
द्गोपवेषधरो गोपतिः ।। गौर्मही तस्याः पतित्वाद्वा समस्तानि भूतानि पालय
न्रक्षञ्जगत इति गोप्ता ।। न ज्ञानकर्मभ्यां गम्यते किंतु ज्ञानेन गम्य
त इति ज्ञानगम्यः ।। कालेनापरिच्छिन्नत्वात्पुरापि भवतीति पुरा
तनः ।। शारीरारंभकभूतानां भरणात्प्राणरूपधरः शारीरभूतभृत् ।। ३९
पालको भोक्ता निरतिशयानंदसंदोहसंभोगाद्भोक्ता ।।५००।। इति वा

72

म्नांशा तं पंचमविवृतं ।। वीरो हिरण्यगर्भ उमो नर्षौ नक्षत्री सर्वदर्शी
मनोहरो वस [illegible] धरं महादेवः ।। वृषिवर्ध साहहद्ध्यं ति कपींद्रो वरा
हमूर्तिः कपि नामिंद्रः कपीन्द्रः राघवो वा ।। भूरयो यज्ञदक्षिणाः धर्म
मर्यादां दर्शयन् यज्ञं कुर्वतो विद्यंत इति भूरिदक्षिणः ।। ५८ ।। सोमप
पोमृतपः सोमः पुरुजित्पुरुसत्तमः ।। विनयो जयः सत्यसंधो दाशार्हः
सात्वतांपतिः ।। ५९ ।। सोमं पिबतीति सर्वयज्ञेषु यष्टव्यत्वाद्देवतारूपेणे
ति सोमपः ।। धर्ममर्यादां दर्शयन् यजमानरूपेण वा सोमपः ।। स्वा
त्मामृतरसं पिबन्नमृतपः ।। मथितममृतमसुरैर्ह्रियमाणं रक्षि
त्वा [illegible] देवान्पाययित्वा स्वयमप्यपिबदिति वा ।। सोमरूपेणौ
षधीः पोषयन् सोमः ।। उमया सहितः शिवो वा ।। पुरून् बहून् जयती
ति पुरुजित् ।। विश्वरूपत्वात्पुरुः उत्कृष्टत्वात्सत्तमः ।। पुरुश्चासौ
तमश्चेति पुरुसत्तमः ।। विनयं दंडं करोति दुष्टानामिति विनयः ।।
समस्तान्विजयतीति जयः ।। सत्या संधा संकल्पोस्येति सत्यसंधः

73

३८

ससत्संकल्पइतिश्रुतेः॥१०॥दाशोदानंतदर्हतीतिदाशार्हः॥दाशा
र्हकुलोद्भवाद्वा॥सात्वतंनामतंत्रंतत्करोतितदाचष्टइतिणिचिकृ
तेक्विप्वतिक्विप्प्रत्ययेचणिनिटीतिणिलोपेचकृतेपदंसात्वतः॥तेषांप
तिर्योगक्षेमकृदइतिसात्वतांपतिः॥५४॥जीवोविनयितासाक्षीमुकुं
दोमितविक्रमः॥अंभोनिधिरनंतात्मामहोदधिशयोंतकः॥५५॥
प्राणान्क्षेत्रज्ञरूपेणधारयन्जीवउच्यते॥विनयित्वंविनयितानाच
साक्षात्पश्यतिप्रजानामितिविनयितासाक्षी॥अथवानयितेनेतीतिवाचि
नारूपविनयिता॥साक्षीसाक्षाद्द्रष्टाआत्मातिरिक्तंवस्तुनपश्यती
त्यर्थः॥मुक्तिंददातीतिमुकुंदः॥पृषोदरादित्वात्साधुत्वं॥वर्णाक्षर
साम्यान्निरुक्तिवचनात्तु॥नैरुक्तानांमुकुंदइतिनिरुक्तिः॥अ
मिताअपरिच्छिन्नाविक्रमास्त्रयःपादविक्षेपाअस्यामितविक्र
मः॥अमितंवीर्यमस्येतिवामितविक्रमः॥अंभांसिदेवादयोस्मिन्निधी ३८
यंतइत्यंभोनिधिः॥तानिहवाएतानिचत्वार्यंभांसिदेवामनुष्याः

74

पितरोऽसुरा इति श्रुतेः ॥ सागरो वा ॥ सरसामस्मि सागर इति भ-
गवद्वचनात् ॥ देशतः कालतो वस्तुतश्चापरिच्छिन्नस्वरूपत्वादन-
न्तात्मा ॥ संहृत्य सर्वभूतान्येकार्णवे शेति महोदधिशयः ॥ अ-
न्तं करोति भूतानामित्यन्तकः ॥ तत्करोति तदाचष्ट इति णिचि कृते
ण्वुल्के चो ॥ तल्लचू ॥ तस्य युवोरनाकावित्यकादेशः ॥ ५० ॥ २० ॥
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ॥ आनन्दो नन्दनो नन्दः सत्यध-
र्मा त्रिविक्रमः ॥ ५१ ॥ अहिछोरनामपतं कामोऽजः ॥ महः पूजा तदर्हत्वा-
न्महार्हः ॥ स्वभावेनैव आभ्यां नित्यसन्निष्पन्नरूपत्वादिति स्वाभाव्यः ॥
जितारमित्रौ रागद्वेषादयो बाह्या रावणादयश्च येनासौ जितामित्रः ॥
स्वात्मामृतरसास्वादान्नित्यप्रमोदते ध्यायिनां ध्यानमात्रेण वा प्रमो-
दं कुरुत इति वा प्रमोदः ॥ आनन्दस्वरूपमस्येत्यानन्दः ॥ एतस्यैवा-
नन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः ॥ नन्दयतीति नन्दनः ॥
सर्वैरुपपत्तिभिः समृद्धो नन्दः ॥ सुखं वैषयिकं नास्य विद्यते नन्दे
इत्या॰

३८

वा ॥ यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति श्रुतेः ॥ सत्या धर्मज्ञानाद्यो
स्येति सत्यधर्मः ॥ त्रयो विक्रमास्त्रिषु लोकेषु क्रांता यस्य स त्रिविक्र
मः ॥ त्रीणि पदा विचक्रम इति श्रुतेः ॥ त्रिरित्येव त्रयो लोकाः की
र्तिता मुनिसत्तमैः ॥ क्रमस्तेषां तथा सर्वांस्त्रिविक्रमो जनार्दने
ति हरिवंशे ॥ ३० ॥ ५ ॥ महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीप
तिः ॥ त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतांतकृत् ॥ ५० ॥ मह
र्षिः कपिलाचार्य इति सविशेषणमेकं नाम ॥ महांश्चासावृषि
श्चेति महर्षिः ॥ कृत्स्नस्य वेदस्य दर्शनात् ॥ अन्ये तु वेददेश
दर्शनात् ॥ ऋषयः कपिलश्चासौ सांख्यस्य शुद्धात्मतत्ववि
ज्ञानस्याचार्यश्चेति कपिलाचार्यः ॥ शुद्धात्मतत्वविज्ञानं सां
ख्यमित्यभिधीयत इति व्याससमृतेः ॥ ऋषिं प्रसूतं कपिलं म
हांतमिति श्रुतेः ॥ सिद्धानां कपिलो मुनिरिति स्मृतेश्च ॥ कृतं कार्यं
जगत् ॥ तदात्मा कृतं चेतनं तज्जानातीति कृतज्ञः ॥ मेदिन्याः भूम्याः पतिः ३८

76

मेदिनीपतिः॥ त्रीणि पदान्यस्येति त्रिपदः॥ त्रीणि पदा विचक्रमे इति श्रु
तेः॥ गुणावेशेन संजातास्तिस्रो दशा आवस्थास्तासां मध्यस्थ इति त्रि
दशाध्यक्षः॥ मत्स्यरूपमहति शृंगे प्रलयांभोधौ नावं बध्वा चिक्री
डितिमत्तशृंगः॥ कृतस्यांतं संहारं करोतीति कृतांतं मृत्युं कृंतती
तिवा कृतांतकृत्॥ ५७॥ महावराहो गोविंदः सुषेणः कनकांगदी॥
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः॥ ५८॥ महांश्चासौ वराहश्चे
तिमहावराहः॥ गोभिर्वाणिभिर्विंदते वेदान्वाक्यैरिति वा गोविंदः॥ गो
भिरेवयतो वेद्यो गोविंदः समुद्राहृत इति विविक्तकै॥ शोभना गणा अस्ये कु
कायस्य स सुषेणः॥ ॥ कनकमयान्यंगदानि अस्येति कनकांगदी सेना
रहस्योपनिषद्वा हृदयाकाशे निहित इति वा गुह्यः॥ ज्ञाने
श्वर्यबलादिभिर्गंभीरो गंभीरः॥ दुःप्रवेशत्वाद्गहनः॥ अवस्थात्र
यभावाभावसाक्षित्वाद्गहनो वा॥ वाङ्मनसामगोचरत्वाद्गुप्तः॥ एष
सर्वेषु गूढ आत्मा न प्रकाशते इति श्रुतेः॥ मनस्तत्त्वात्मकं चक्रं बुद्धि

तस्मात्स्मकौमोंदा ॥ धारयन्लोकरक्षार्थमुक्तश्चक्रगदाधरः ॥५८॥ वेधाः
स्वांगोजितः कृष्णो दृढः संकर्षणोच्युतः ॥ वरुणो वारुणो वृक्षः पुष्करा
क्षो महामनाः ॥५९॥ विधानं वेधाः पृषोदरादित्वात्साधुत्वं ॥ स्वयमेव का
र्यकरणांगसहकारीति स्वांगः ॥ न केनापि अवतारेषु जित इत्यजि
तः ॥ कृष्णद्वैपायनः कृष्णः ॥ कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्र
भुं ॥ को ह्यन्यः पुंडरीकाक्षान्महाभारतकृद्भवेदिति विष्णुपुराणव
चनात् ॥५०॥ स्वरूपसामर्थ्यादेरप्रच्युतस्वभावत्वात् दृढः ॥ संहा
रसमये युगपत्प्रजाः संकर्षयतीति संकर्षणोच्युत इति नामैकं सवि
शेषणं ॥ स्वरश्मिसंचरणात् सायंगतः सूर्यो वरुणः ॥ इमं मे व
रुण श्रुधीति मंत्रवर्णात् ॥ वरुणस्यापत्यं वशिष्ठोगस्त्यो वा वारुणः
॥ वृक्ष इवाचलतया स्थित इति वृक्षः ॥५८॥ वृक्ष इव स्तब्धो दिवि तिष्ठ
त्येक इति श्रुतेः ॥६०॥ व्याप्त्यर्थादक्षतेर्धातोः पुष्करोपपदाद्दणिप्रत्यये
सति पुष्कराक्षः ॥६१॥ हृदयपुंडरीके चेतनतः स्वरूपेण प्रकाशत इति

३९

पुष्कराक्षः॥ सृष्टिस्थित्यंतकर्माणि मनसैव करोतीति महामनाः॥ म
नसैव जगत्सृष्टिसंहारं च करोति य इति श्रीविष्णुपुराणे॥ भगवा
न् भगहानंदी वनमाली हलायुधः॥ आदित्यो ज्योतिरादित्यः सहि
ष्णुर्गतिसत्तमः॥ ५०॥ ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः॥ वै
राग्यस्य च मोक्षस्य षण्णां भग इतीरणा तु॥ सोस्यास्तीति भगवान्॥
इति विष्णुपुराणे॥ ऐश्वर्यादिकं संहारसमये हंतीति भगहा॥ सु
खरूपत्वात् सदानंदी॥ सर्वसंपत्समृद्धत्वात् सदानंदी वा॥ ६०॥ भूत
तन्मात्ररूपां वैजयंत्याख्यां वनमालां वहन् वनमाली॥ हलमायुध
मस्येति हलायुधो बलभद्राकृतिः॥ अदित्यां कश्यपाद्वामनरूपे
ण जात इत्यादित्यः॥ सवितृमंडलस्थितो ज्योतिरादित्यः॥ द्वंद्वानि शीतो
ष्णादीनि सहत इति सहिष्णुः॥ गतिश्चासौ सत्तमश्चेति गतिसत्तमः
॥ ६०॥ सुधन्वा खंडपरशुर्दारुणो द्रविणप्रदः॥ दिवस्पृक् सर्वदृग्
व्यासो वाचस्पतिरयोनिजः॥ ६१॥ शोभनमिंद्रियादिमयं शार्ङ्गं धनु
रस्यास्तीति सुधन्वा॥ शत्रूणां खंडनात् खंडः परशुरस्य जामदग्न्या

कृतेरिति स्वं परक्षुः ॥ स्वं परक्षुः ॥ सन्मार्गनिरोधिनां दारुणत्वाद्दा
रुणः ॥ द्रविणं वाञ्छितं भक्तेभ्यः प्रददाति द्रविणप्रदः ॥ ७० ॥ दिवस्पृ
र्शीना दिवस्पृक् ॥ सर्वदृशा सर्वज्ञानानां विस्तारकृद्व्यासः ॥ सदृग्व्या
सः ॥ अथवा सर्वा चासौ दृक् चेति सर्वदृक् ॥ सर्वाकारं ज्ञानं सर्वस्य द्रष्टृत्वा
त्सर्वदृक् ॥ ऋग्वेदादिविभागेन चतुर्धा वेदा व्यवस्ता अन्यानि च पुरा
णानि व्यस्तानि येनेति व्यासः ॥ ब्रह्मा वाचस्पतिरयोनिजः ॥ वाचो वि
द्यायास्पतिर्वाचस्पतिः ॥ जनन्या न जायत इति अयोनिजः ॥ ७१ ॥ त्रिसा
मा सामगः साम निर्वाणं भेषजं भिषक् ॥ संन्यासकृच्छमः शान्तो नि
ष्ठा शान्तिः परायणः ॥ ७२ ॥ वेदव्रतामाख्येने त्रिभिः सामभिः सामगैः
स्तुत इति त्रिसामा ॥ सामगायतीति सामगः ॥ वेदानां सामवेदोस्मी
ति भगवद्वचनात् ॥ सामवेदः ॥ समस्तदुःखोपशमलक्षणं परमा
नंदरूपं निर्वाणं ॥ संसाररोगौषधं भेषजं ॥ संसाररोगनिर्मोक्षक
रिणीं परां विद्यामुपदिदेशेति भिषक् ॥ भिषक्तमं त्वा भिषजां शृणोमीति श्रुतेः ॥
मोक्षार्थं चतुर्थाश्रमं कृतवानिति संन्यासकृत् ॥ ८० ॥ संन्यासिनां प्र

धान्ये शशममाचष्टे इति शमः ॥ यतीनां प्रशमो धर्मो नियमो वन
वासिनां ॥ दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणां ॥ इति स्मृ
तेः ॥ तं करोति तदाचष्टे इति णिचि पचाद्यचि निष्पद्यते रूपं ॥ स
र्वभूतानां शाम्यतीति वा शमः ॥ विषयेष्वसंगतया शांतः ॥ निष्कले
निष्क्रियं शांतमिति श्रुतेः ॥ प्रलये नितरां तत्रैव तिष्ठन्ति भूतानीति नि
ष्ठा ॥ समस्ताविद्यानिवृत्तिः शांतिः सा ब्रह्मैव ॥ परमुत्कृष्टमयनं स्था
नं पुनरावृत्तिशंकारहितमिति परायणं ॥ गुणलिंगपक्षे बहुव्रीहिः
॥ हस्ताः शुभांगः ॥ शांतिदः स्रष्टा कुमुदः कुवलेशयः ॥ गोहितो गोप
तिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३ ॥ सुंदरां तनुं धारयन् शुभांगः
॥ रागद्वेषादिनिर्मोलक्षणां शांतिं ददातीति शांतिदः ॥ सर्गादौ स रः
र्वभूतानि ससर्जेति स्रष्टा ॥ कौ भूम्यां मोदत इति कुमुदः ॥ कोः क्षिते
र्वलनात् संवरणात् कुवलं जलं तस्मिन् शेषोदरे शेते इति कुवले
शयः ॥ यद्वा कुयाशिरः कलादयस्तुक् संप्रमाः ॥ कुवलं बदरीफल
स्य मध्ये शेते तज्जंतुः ॥ सोपि तस्य विभूतिरिति वा हरिः कुवलेश

४१

पः ॥ को भूम्यां संध्योरन्तरलति सर्पाणामुदरं कुवलं तस्मिन् शेषाद्रे शेत इति
वा कुवलेशयः ॥ ५९० ॥ गवां वृध्यर्थं गोवर्धनं धृतवानिति गोभ्यो हितो
गोहितः ॥ गौर्भूमेर्भारावतारणेच्छया शरीरग्रहणं कृतवान् गोहि
तः ॥ गो भूम्यादेः पतिः गोपतिः ॥ रक्षको जनको जगत इति गोप्ता ॥ स्व
मायया स्वमात्मानं संवृणोतीति वा गोप्ता ॥ सर्वकामान् वर्षिके अ
क्षिणी यस्य स वृषभाक्षः ॥ वृषो धर्मः स एव दृष्टिरस्येति वृषभाक्षः
वृषो धर्मः प्रियो यस्य स वृषप्रियः ॥ वा प्रियस्येति पूर्वनिपातवि
कल्पविधानात् परनिपातः ॥ ६३ ॥ अनिवर्ती निवृत्तात्मा संक्षे
प्ता क्षेमकृच्छिवः ॥ श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः
॥ ६४ ॥ देवासुरसंग्रामान्न निवर्तत इति अनिवर्ती ॥ वृषप्रियत्वा
द्धर्मान्न निवर्तत इति वा ॥ स्वभावतो विषयेभ्यो निवृत्त आत्मास्येति नि
वृत्तात्मा ॥ विस्तृतं जगत् संहारसमये सूक्ष्मरूपेण संक्षिपन् संक्षेप्ता ॥ ४१॥
उपागतस्य परिरक्षणं करोतीति क्षेमकृत् ॥ स्मृतिमात्रेण पावय

82

धियः ।।६००।। इति नाम्नां षष्ठशतं विवृतं ।। कूपींद्रेदाशाहोल्लो महर्षिः
कनकांगदी हृत्कौ वनमाली दिवस्य कृशामोगोहितः ।। श्रीवत्ससंज्ञकं
चिन्हमस्य वक्षसि स्थितमिति श्रीवत्सवक्षाः ।। अस्य वक्षसि श्रीरन
पायिनी वसतीति श्रीवासः ।। अमृतमथने सर्वान्सुरासुरादीन्विहा
य श्रीरेनं वरयामासेति श्रीपतिः ।। श्रीयः शक्तिः त्तस्याः पतिरिति
वा। परास्य शक्तिर्विविधैव श्रूयत इति श्रुतेः ।। ऋग्यजुःसामलक्ष
णा श्रीः येषां ते श्रीमन्तो विरञ्च्यादीनां प्रधानं श्रीमतां वरः ।। ऋचः सा
मानि यजूंषि सा हि श्रीरमृता सतामिति श्रुतेः ।।६०४।। श्रीदः श्रीशः श्री
निवासः श्रीनिधिः श्रीविभावनः ।। श्रीधरः श्रीकरः श्रेयः श्रीमान्लो
कत्रयाश्रयः ।।६०५।। श्रीयं ददति भक्तानामिति श्रीदः ।। श्रीय ईशः श्रीशः ।।
श्रीमत्सु नित्यं वसतीति श्रीनिवासः ।। श्रीशब्देन श्रीमंतो लक्ष्यंते ।। सर्वैश्वर्यादि
मयेस्मिन्नखिलः श्रीयो निधीयन्ते इति श्रीनिधिः ।। कर्मानुरूपेणावि
विधाः श्रीयः सर्वभूतानां भावयतीति श्रीविभावनः ।। सर्वभूतानां जन
नीं श्रीयं वक्षसि वहन् श्रीधरः ।।६१०।। स्मरतां स्तुवतामर्चतां भक्तानां

८३

श्रीयंकरोतीतिश्रीकरः॥अनयायिसुखावाप्तिलक्षणंश्रेयःतदस्यप
रस्यरूपमितिश्रेयः॥श्रीयोस्यसश्रीमान्॥त्रयाणांलोकानांआश्रय
त्वाल्लोकत्रयाश्रयः॥६५॥स्वक्षःस्वंगःशतानंदोनंदिर्ज्योतिर्गणेश्वरः
॥विजितात्माविधेयात्मासत्कीर्तिश्छिन्नसंशयः॥६६॥शोभनेपुंडरीको
पमेअक्षिणीअस्येतिस्वक्षः॥शोभनान्यंगान्यस्येतिस्वंगः॥एकए
वपरमानंदउपाधिभेदाच्छतधाभिद्यतइतिशतानंदः॥एतस्यैवा
नंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुतेः॥परमानंदविग्रहो
नंदिः॥ज्योतिर्गणानामीश्वरोज्योतिर्गणेश्वरः॥तमेवभांतमनुभातिस
र्वमित्यादिश्रुतेः॥यदादित्यगतंतेजइत्यादिस्मृतेश्च॥विजितंमनआ
त्मायेनसविजितात्मा॥२०॥नकेनापिविधेयआत्मास्वरूपमस्येत्य
विधेयात्मा॥सतीअवितथाकीर्तिरस्येतिसत्कीर्तिः॥करामलक
वत्सर्वसाक्षात्कृतत्वात्क्वापिसंशयोनास्तीतिछिन्नसंशयः॥६७॥
उदीर्णःसर्वतश्चक्षुरनीशःशाश्वतःस्थिरः॥भूशयोभूषणो
भूतिर्विशोकःशोकनाशनः॥६८॥सर्वभूतेभ्यःसमुद्रिक्तो ५२

८A

त्वादुदीर्णः ॥ सर्वतः सर्वस्य चैतन्येनूपश्यतीति सर्वतश्चक्षुः ॥ वि
श्वतश्चक्षुरिति श्रुतेः ॥ न विद्यते स्येशा इत्यनीशः ॥ न तस्येशः
कश्चनेति श्रुतेः ॥ शश्वद्भवन्नपि न विक्रियां कदाचिदुपैतीति शा
श्वतः स्थिर इति नामैकं ॥ लंकामार्गान्वेषणाय सागरमुपगतो भू
मावशेतेति भूशयः ॥ स्वेच्छावतारैर्बहुभिर्भूमिं भूषयन् भूषणः ॥
भूतिर्भवनं सत्ता विभूतिर्वा समस्तविभूतीनां कारणत्वाद्वा विभू
तिः ॥ ३० ॥ विगतः शोको स्य परमानंदैकरूपत्वादिति विशोकः ॥ स्मृ
तिमात्रेण भक्तानां शोकं नाशयतीति शोकनाशनः ॥ ६७ ॥ अर्चिष्मा
नर्चितः कुंभो विशुद्धात्मा विशोधनः ॥ अनिरुद्धो प्रतिरथः प्रद्यु
म्नो मितविक्रमः ॥ ६८ ॥ अर्चिष्मतो यदीयेनार्चिषा चंद्रसूर्यादि
यः स एव मुख्यो र्चिष्मान् ॥ सर्वलोकार्चितैर्विरंच्यादिभिरर्चित
त्वादर्चितः ॥ कुंभवदस्मिन्सर्वं प्रतिष्ठितमिति कुंभः ॥ गुणत्रया
तीतत्वाद्विशुद्धात्मेति विशुद्धात्मा ॥ स्मृतिमात्रेण पापानां क्षय

४३

णास्य विशेषो धनः ॥ चतुर्व्यूहेष्वनिरुद्धो प्रतिरथः ॥ प्रतिपक्षोस्य न वि
द्य । इत्यप्रतिरथः ॥ प्रकृष्टं द्युम्नं द्रविणमस्येति प्रद्युम्नः ॥ चतुर्व्यूहा
त्मा वा ॥ ४७ ॥ अमितः विक्रमोस्य सोमितविक्रमः ॥ ४८ ॥ कालनेमिनि
हा वीरः शौरिः शूरजनेश्वरः ॥ त्रिलोकात्मा त्रिलोकेशः केशवः के
शिहा हरिः ॥ ४९ ॥ कालनेमिनमसुरं निर्जघानेति कालनेमिहा ॥
वीरः शूरः ॥ शूरकुलोद्भवत्वाच्छौरिः ॥ शूरजनानां वासवादीनां
शौर्यातिशयेनेष्ट इति शूरजनेश्वरः ॥ त्रयाणां लोकानामंतर्यामि
तयात्मेति ॥ त्रया लोका अस्मात् परमार्थतो न विद्यंत इति वा त्रिलोका
त्मा ॥ त्रयो लोकेस्तदाज्ञलाः स्वेषु कर्मसु वर्तंत इति त्रिलोकेशः ॥
केशसंज्ञिताः सूर्यादिसंक्रांता अंशवस्तद्वंतो यस्य केशवः ॥ अंश
वो यत्प्रकाशंते मम ते केशसंज्ञिताः ॥ सर्वज्ञाः केशवं तस्मान्मामाहुर्द्वि
जसत्तमाः इति महाभारते ॥ ब्रह्माविष्णुशिवाख्याः शक्तयः केशाःसं ४३

शितास्तत्त्वतया वा केशवः ॥ अयः केशिन इति श्रुतेः ॥ मत्स्ये शोव
सुधातले इत्यादौ केशशब्दः श्रुतिपर्यायत्वेन प्रयुक्तः ॥ को ब्रह्मेति
समाख्यातः ईशोहं सर्वदेहिनां ॥ आवां तवांशसंभूतौ तस्मात्केशवना
मवानिति श्रीहरिवंशे ॥ केशिनामानमसुरं हतवानिति केशिहा ॥
सहेतुकं संसारं हरतीति हरिः ॥ ८९ ॥ ५० ॥ कामदेवः कामपालः का
मी कांतः कृतागमः ॥ अनिर्देश्यवपुर्विष्णुर्वीरोनंतो धनंजयः ॥ ७० ॥
धर्मार्थपुरुषार्थचतुष्टयं वांछद्भिः काम्यत इति कामः स चासौ देवश्चे
ति कामदेवः ॥ कामीनां कामान्पालयतीति कामपालः ॥ पूर्णकामत्वा
त्कामी ॥ कामोस्यास्तीति वा ॥ सो कामयतेति श्रुतेः ॥ द्विपरार्धांते क
स्य प्रलयो यस्मादिति कांतः ॥ कृत आगमः श्रुतिस्मृत्यादिलक्ष
णो येन स कृतागमः ॥ वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दना
दिति वचनात् ॥ इदं तदीदृगेवेति निर्देष्टुमशक्यत्वेन गुणाद्यतीतत्वा
द्रूपमस्येत्यनिर्देश्यवपुः ॥ रोदसी व्याप्य कांतिरभ्यधिका स्थिता

४४

स्यो । नविष्णुः ॥ व्याप्य मे रोदसी पार्थ कान्तिरभ्यधिका स्थिता ॥ क्रमणाच्चा
प्यहं पार्थ विष्णुरित्यभिसंज्ञितः इति महाभारते ॥ गत्यादिमत्त्वाद्वी
रः ॥ वि गति प्रजनकान्त्यसनखादनेष्विति धातुपाठात् ॥ व्या
पित्वान्नित्यत्वात्सर्वात्मत्वाद्देशतः कालतो वस्तुतश्चापरिच्छि
न्नोऽनंतः ॥ सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः ॥ गंधर्वाप्सरसः सिद्धाः
२६ किन्नरोरगचारणाः ॥ नांतं गुणानां गच्छंति तेनानंतोऽयमव्ययः इ
ति श्रीविष्णुपुराणवचनात् ॥ अनंतः ॥ यद्धि दिग्विजये प्रभूतं धन
मजयत्तेन धनंजयोऽर्जुनः ॥ पाण्डवानां धनंजय इति भगवद्वचना
त् ॥ ७० ॥ ५० ॥ ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ॥ ब्रह्म
विद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७१ ॥ तपो वेदाश्च विप्रा
श्च ज्ञानं च ब्रह्मसंज्ञितं ॥ तेभ्यो हितत्वाद् ब्रह्मण्यः ॥ तपआदीनां
कर्तृत्वाद् ब्रह्मकृत् ॥ ब्रह्मात्मना सर्वं सृजतीति ब्रह्मा ॥ बृहत्त्वा ४४
द् बृंहणत्वाच्च सत्यादिलक्षणं ब्रह्म ॥ सत्यं ज्ञानमनंतं ब्रह्मेति

88

मतः ॥ समस्तमितभेदं यत्सत्तामात्रमगोचरं ॥ वचसामात्मसं
वेद्यं तज्ज्ञानं ब्रह्मसंज्ञितमिति विष्णुपुराणे ॥ तपः प्रजादीनां वि
वर्धनात् ॥ ब्रह्मविवर्धनः ॥ वेदं वेदार्थं च यथावद्वेत्ति विंदते वे
ति ब्रह्मवित् ॥ ब्रह्मात्मना ब्रह्मणात्मना समस्तानां प्रवचनं कुर्व
न् वेदस्यायमिति ब्राह्मणः ॥ ब्रह्मसंज्ञितानि तच्छेषभूतानीति ब्रह्मी ॥
वेदान्स्वात्मभूतान् जानातीति ब्रह्मज्ञः ॥ ब्राह्मणानां प्रियो ब्राह्मण
प्रियः ॥ ब्राह्मणाः प्रिया अस्येति वा ॥ घ्नंतं शपंतं परुषं वदंतं यो
ब्राह्मणं न प्रणमेद्यथाहं ॥ स पापकृद्ब्रह्मदवाग्निदग्धो वध्य
श्च दंड्यश्च न चास्मदीय इति ॥ यं देवं देवकी देवी वसुदेवाद
जीजनत् ॥ भौमस्य ब्रह्मणो गुप्त्यै दीप्तमग्निमिवारणिरिति म
ला२ हाभारते ॥ ७१ ॥ ७० ॥ मॅक्रमो महाकर्मा महातेजा महोरगः ॥ महाक
क्रतुर्महायज्वा महायज्ञो महाहविः ॥ ७२ ॥ महान्तः क्रमाः पा

भ

रविंपाः अस्येति महाकर्मः ॥ श्रांतो विष्णुरुरुक्रम इति श्रुतेः ॥ महज्ज
गदुपत्त्यादिकर्मास्येति महाकर्मा ॥ तेजस्विनो यदि येन तेजसा भास्व
रादयः ॥ तत्तेजो महदस्येति महातेजाः ॥ प्रकीर्त्तितः ॥ येन सूर्यस्तप
ति तेजसेद्ध इति श्रुतेः ॥ यदादित्यगतं तेज इत्यादिस्मृतेश्च ॥ कार्य
शौर्यादिधर्मैर्महद्भिः समलंकृत इति वा स्यान्महातेजाः ॥ महांश्चा
सावुरगश्चेति महोरगः ॥ सर्पाणामस्मि वासुकिरिति भगवद्वच
नात् ॥ महांश्चासौ क्रतुश्चेति महाक्रतुः ॥ यथाश्वमेधः क्रतुराडिति
मनुर्वेचनात् ॥ सोऽपि महानेवेति श्रुतेः ॥ महांश्चासौ यज्वा चेति लोकसं
ग्रहार्थं यज्ञान्निर्वर्त्तयन् महायज्वा ॥ महांश्चासौ यज्ञश्चेति महाय
ज्ञः ॥ यज्ञानां जपयज्ञोऽस्मीति भगवद्वचनं ॥ महच्च तद्धविश्च ब्रह्मा
त्मनि सर्वं जगत्तात्मतया रूपनद इति महाहविः ॥ महाक्रतुरित्यादि ८५
पो बह, श्री शिवो ॥ ७० ॥ स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिस्तोता रणः
प्रियः ॥ पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७१ ॥ सर्वैः स्तू

यते न स्तोता कस्यचिदिति स्तव्यः ॥ अत एव स्तवप्रियः ॥ ८० ॥ स्तूयते
येनेति स्तोत्रं ॥ गुणसंकीर्तनात्मकं तद्धरिरेवेति स्तुतिः स्तवनक्रि
या स्तोतापि स एव ॥ प्रियो रणोस्य यतः ॥ पंचमहायुधानि धत्ते सततं
लोकरक्षणार्थमतो रणप्रियः ॥ सर्वैः कामैः सकलाभिः शक्ति
भिश्च संपन्नः पूर्णः ॥ न केवलं पूर्ण एव पूरयिता च सर्वेषां संप
द्भिः ॥ स्मृतिमात्रेण कल्मषाणि क्षपयतीति पुण्यः ॥ पुण्यकीर्तिर
स्य यतः पुण्यमावहत्यस्य कीर्तिर्नृणामिति पुण्यकीर्तिः ॥ आंतरै
र्बाह्यैर्व्याधिभिः कर्मजैर्न पीड्यत इत्यनामयः ॥ ९३ ॥ मनोजव
स्तीर्थकरो वसुरेता वसुप्रदः ॥ वसुप्रदो वासुदेवो वसुर्वसुम
ना हविः ॥ ७४ ॥ मनसो वेग इव वेगोस्य सर्वगतत्वादिति मनोज
वः ॥ ९० ॥ चतुर्दशविद्यानां बाह्यविद्यासमयानां च प्रणेता प्र
वक्ता चेति तीर्थकरः ॥ हयग्रीवरूपेण मधुकैटभौ हत्वा विरिं

91

निवासः सुयामुनाः ॥७५॥ वसामोस्मीति ये विदुस्ते संततैः प्राप्यंत इति
सन्मतिः ॥ सन्मुखष्टास्येति वा सद्गतिः ॥ सत्कृतिर्जगदुत्पत्त्यादिलक्षणा
स्य यस्यास्तेन सत्कृतिः ॥७०॥ इति नाम्नां सप्तमशतं विवृतं ॥ श्रीव
त्सवक्षाः श्रीकरो विधेयात्मा विष्णुक्रमितिविक्रमः ॥ कामदेवो ब्रह्मण्यो
महाक्रमस्तोयतीर्थकरः ॥ सज्जातीयविजातीयस्वगतभेदरहिता ॥
एकमेवाद्वितीयमिति श्रुतेः ॥ सत्यं च परमात्मा चिदात्मकः सर्वात्मना
मात्मभूतत्वात्सत्कृतिः ॥ आत्मन्यप्रवर्तीते बोधयमानत्वाच्च सत्ताप्यस
[illegible] लोकोत्तिको वाबाधः ॥ प्रपंचस्य वियासत्तुः ॥ सत्तात्वविदाप
कृष्णमयनमिति सत्परायणः ॥ हनुमत्प्रमुखाः सैनिकाः शौर्यशालि
नो यस्यां सेनायां सा सूरसेना यस्य स सूरसेनः ॥ यदुनां प्रधानत्वा
द्यदुश्रेष्ठः ॥ सतां विदुषामाश्रय इति सन्निवासः ॥ शोभना यामुना
यमुनासंबंधिनः परिवेष्टारोस्येति वा सुयामुनः ॥ गोपाळवेषधराय
मुनाः परिवेष्टारः पुत्रसनादयः ॥ शोभना अस्येति वा सुयामुनः ॥७५॥
भूतानां वासो वासुदेवः सर्वासुनिलयोऽनलः ॥ दर्पहा दर्पदो दृप्तो दुर्धरो

५७

थाऽपराजितः ॥७६॥ भूतान्यत्राभिमुख्येन वसंतीति भूतावासः ॥ वसंति
त्वयि भूतानि भूतावासस्ततो मम वासिति श्रीहरिवंशे ॥ जगदाच्छादय
ति मायये ति वासुः स एष देवश्चेति वासुदेवः ॥ सर्व असवः प्राणा जी
वात्मके यस्मिन्नव्यये विलीयंते स सर्वासुनिलयः ॥१॥ अलं पर्याप्तिः
शक्तिसंपदां सा न विद्यते यस्य सोऽनलः ॥ धर्मविरुद्धपथिस्थितानां दर्पं हं
तीति दर्पहा ॥ धर्मवर्त्मनि वर्तमानानां दर्पं गर्वं ददातीति दर्पदः ॥ स्वा
त्मामृतरसास्वादनान्नित्यप्रमुदितो दृप्तः ॥ न शक्यते धारणा यस्य
प्रणिधानादिषु सर्वोपाधिविनिर्मुक्तत्वात्तथापि तत्प्रसादतः केश्चित्तु
दुःखेन हृदये धार्यते जन्मांतरसहस्रेषु भावनयोगात्तस्माद्दुर्धरः ॥
कूटोपेतरस्तेबामिति भगवद्वचनात् ॥ नांतरैः रागादिभिर्बा
ह्यैः रावणशत्रुभिः पराजित इत्यपराजितः ॥७६॥ विश्वमूर्तिर्महामू
र्तिर्दीप्तमूर्तिरमूर्तिमान् ॥ अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ५७॥
॥७७॥ विश्वा मूर्तिरस्य सर्वात्मकत्वादिति विश्वमूर्तिः ॥ शेषपर्यंक

९३

शायिनोस्य महती मूर्तिरिति महामूर्तिः॥ ज्ञानमयी मूर्तिः स्वेच्छया तेजसी
वा मूर्तिर्दीप्तिरस्येति दीप्तमूर्तिः॥ कर्मनिबंधना मूर्तिरस्य न विद्यत
इत्यमूर्तिमान्॥२०॥ अवतारेषु स्वेच्छया लोकानामुपकारिणी बह्वी
मूर्तीर्गृह्णातीत्यनेकमूर्तिः॥ एवमप्यनेकमूर्तित्वं तथाप्ययमीदृ
श इति न व्यज्यत इत्यव्यक्तः॥ नानाविकल्पजा मूर्तयः संविदाकृ
तेः संतीति शतमूर्तिः॥ यतो विश्वादिमूर्तित्वमत एव शताननः॥७९॥
एकोनेकः सवः कः किं यत्तत्पदमनुत्तमं॥ लोकबंधुर्लोकनाथो मा
धवो भक्तवत्सलः॥८०॥ परमार्थतः सजातीयविजातीयस्वगत
भेदविमुक्तत्वादेकः॥ एकमेवाद्वितीयमिति श्रुतेः॥ मायया बहुरू
पत्वादनेकः॥ इन्द्रो मायाभिः पुरुरूप ईयत इति श्रुतेः॥ सोमो यत्राभिसूय
ते सोऽध्वरः सवः॥ कः॥ कः शब्दः सुखवाचकः तेन स्तूयते कः इति कं ब्रह्मे
ति श्रुतेः॥ सर्वपुरुषार्थरूपत्वाद्ब्रह्मैव विचार्यमिति ब्रह्म किं॥ य
च्छब्देन स्वतः सिद्धवस्तुदेशवाचिना ब्रह्म निर्दिश्यत इति ब्रह्म यत्॥

यतोवाइमानिभूतानिजायंतइतिश्रुतेः ॥७०॥ ततोस्तिब्रह्मतत् ॥ ॐतत्स
दितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतइतिभगवद्वचनात् ॥ पध्यते
मुमुक्षुभिरितिपदं ॥ यस्मादुत्कृष्टंनास्तितदनुत्तमं ॥ सविशेषणमेकं
नामपदमुत्तममिति ॥ आधारभूतेस्मिन्सकललोकाबध्यंतेइति
लोकानांबंधुर्लोकबंधुः ॥ लोकानांजनकत्वाज्जनकसमोबंधुर्ना
स्तीतिवा ॥ लोकानांबंधुंहितोपदेशंश्रुतिस्मृतिलक्षणंकृतवा
निति वा लोकबंधुः ॥ लोकैर्नाथ्यतेयाच्यतेतानुपतपति एनेभ्यः
आशास्तेतेषामीष्टइतिवालोकनाथः ॥ नाथृनाधृयाच्ञोप
तापैश्वर्याशीःष्वितिधातुपाठात् ॥ मधुकुलेजातत्वान्माधवः
॥ भक्तस्नेहवान्भक्तवत्सलः ॥ स्नेहपूर्णेनमनसायेनस्मरति
केशवः ॥ स्नेहदृष्ट्वैवकुर्मस्य तेनतीवामेतेवयातितिमहाभारे
॥७८॥ सुवर्णवर्णोहेमांगोवरांगश्चंदनांगदी ॥ वीरहाविष
मःशून्योघृताशीरचलश्चलः ॥७९॥ सुवर्णस्यवर्णइववं

णोऽस्य ॥ तस्य सुवर्णवर्णः ॥ यदा पश्यते रुक्मवर्णमिति श्रुतेः ॥ हेमवर्णं
गं वपुरस्येति हेमांगः ॥ य एषोंतरादित्ये हिरण्मयः पुरुष इति श्रु
तेः ॥ वराणि शोभनान्यंगानि अस्येति वरांगः ॥ चंदनात्कादनेरं
गं देवकपुरे मुखित तत्रात् चंदनो गदी ॥४०॥ धर्मत्राणाया सुरवीरा
न सुरपुरवा हंतीति वीरहा ॥ समो नास्य विद्यते सर्वविलक्ष
णत्वादिति विषमः ॥ न त्वत्समोस्त्यन्याधिकः कुतोन्योऽप्यादिभ
गाऽकल्पना ॥ सर्वविशेषैरहितत्वाल्लोके छुन्यवछुन्यः ॥ ध्वस्ताः वि
गलिताः आशाः प्रार्थना अस्येति ध्वस्ताशीः ॥ न स्वरूपान्नसा
मर्थ्यान्न चैशानादिकात् तु गुणाच्चलनं विद्यते यस्य [illegible] स अचलः
कालेनोच्युतः ॥ वायुरूपेण चलतीति चलः ॥ ७९ ॥ अमानि
मानदमान्यो लोकस्वामी त्रिलोकधृत् ॥ सुमेधा मेधजो धन्यः
सत्यमेधा धराधुरः ॥८०॥ अनात्मेवस्तुष्वात्माभिमानो नास्ति
स्यहस संवेदनात् निरस[illegible]नो ॥ स्वमापयाः सर्वेषां मनाःस्मस्वा
मा

त्माभिमानं ददातीति ॥ तत्त्वविदामनात्मस्वात्माभिमानं खंडयतीति
वा ॥ भक्तानां मानं सत्कारं ददातीति अधर्मिणां मानं सत्कारं खंड
यतीति वा मानदः ॥ सर्वैर्माननीयः पूजनीयः सर्वेश्वरत्वादिति मान्यः
चतुर्दशानां लोकानां ईश्वरत्वाल्लोकस्वामी ॥ ५० ॥ त्रीन्लोकान्धारय
तीति त्रिलोकधृत् ॥ शोभना मेधा प्रज्ञा यस्येति सुमेधः ॥ नियमसूच
प्रज्ञामेधयोरिति समासान्तो सुच् प्रत्ययः ॥ मेधे अध्वरे जायते इति
मेधजः ॥ कृतार्थो धन्यः ॥ सती अवितथा मेधास्येति सत्यमेधः ॥
अंशैरशेषाद्यैः शेषाद्यैरशेषां धरां धारयन् धराधरः ॥ ८० ॥ ते
जोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ॥ प्रग्रहो निग्रहो व्यग्रो
नैकशृंगो गदाग्रजः ॥ ८१ ॥ तेजोऽसि अंभांसि सर्वदादित्यरूपेण
वर्षणात्तेजोवृषः ॥ द्युतिमतीं कांतिं धारयन् द्युतिधरः ॥
सर्वशस्त्रभृतां श्रेष्ठः सर्वशस्त्रभृतां वरः ॥ भक्तैरुपहृतं पत्रपुष्पा
दि गृह्णातीति प्रग्रहः ॥ धावतो विषयारण्ये दुर्दान्तेन्द्रिय

वाजिनः॥ तत्प्रसादेन रश्मिनेव बध्नातीति वा प्रग्रहवत्प्रग्रहः॥ रश्मौ चेति पाणिनिवचनात्प्रग्रहशब्दस्य साधुत्वं॥ ७९॥ स्ववशेन सर्वं निगृह्णातीति निग्रहः॥ विगतमग्रं अंतो नाशोस्येति व्यग्रः॥ अव्यग्रः भक्तानुग्रहे व्यग्र इति वा॥ चतुःशृंगो नैकशृंगः॥ चत्वारि शृंगाति ऋक्तेः॥ निगदेन मंत्रेणाग्रे जायते इति निशब्दलोपं कृत्वा गदाग्रजः॥ यद्वा गदो नाम श्रीवासुदेवस्यावरजः तस्मादग्रे जायत इति गदाग्रजः॥ ८०॥ चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः॥ चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्॥ ८१॥ चतस्रो मूर्तयो विराट् सूत्रात्मा व्याकृततुरीयात्मानो अस्येति चतुर्मूर्तिः॥ चत्वारो बाहवो ऽस्येति चतुर्बाहुरिति नाम वासुदेवे रूढं॥ शरीरपुरुषः छंदःपुरुषो वेदपुरुषो महापुरुष इति बह्वृचोपनिषदुक्ताश्चत्वारः पुरुषा व्यूहा अस्येति चतुर्व्यूहः॥ आश्रमाणां वर्णानां चतुर्णां यथोक्तकारिणां गतिश्चतुर्गतिः॥ रागद्वेषादिरहितत्वाच्चतुरं मन आत्मास्येति मनोबुद्ध्यहंकारचित्तचतुष्टयात्मकत्वाद्वा चतुरात्मा॥ धर्मार्थकाममो

५०

त्वारो भावाः पुरुषार्थचतुष्टयं भव[illegible]त्पद्यते यस्मादिति चतुर्भावः ॥८०॥ य
थावद्वेत्ति चतुर्णां वेदानां अर्थमिति चतुर्वेदवित् ॥८१॥ एकः पादोस्येत्येकपा
त् ॥ पादोस्य विश्वा भूतानीति श्रुतेः ॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन
स्थितो जगदिति स्मृतेश्च ॥८२॥ समावर्तो निवृत्तात्मा दुर्जयो दुरति
क्रमः ॥ दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥८३॥ संसारचक्रस्य स
म्यगावर्तक इति समावर्तः ॥ सर्वत्र वर्तमानस्यान्यत्र निवृत्तः आत्मा कुतो
पि इस्य निवृत्तात्मा ॥ जेतुं न शक्यत इति दुर्जयः ॥ भयहेतोर्वीदस्याज्ञा
नातिक्रमतीति दुरतिक्रमः ॥ भयादस्याग्निस्तपति भयात्तपति सूर्यः भया
दिंद्रश्च वायुश्च मृत्युर्धावति पंचम इति मंत्रवर्णात् ॥ महद्भयं वज्रमुद्य
तमिति दुर्लभया भक्त्या लभ्यतो दुर्लभः ॥ जन्मांतरसहस्रेषु तपोज्ञा
नसमाधिभिः ॥ नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते इति
व्यासवचनात् ॥ भक्त्या लभ्यस्त्वनन्ययेति भगवद्वचनाच्च ॥ दुःखे ५०
न गम्यते ज्ञायत इति दुर्गमः ॥ अंतरायप्रतिहतैर्दुःखेन प्राप्यत इति

99

+

दुर्गः ॥ दुःखेनावाप्यते चित्ते योगिभिः समाधाविति दुरावासः ॥८०॥
दुरारिणो दुर्गामिनो दानवादयः तान् हन्तीति दुरारिहा ॥८३॥ शु
भांगो लोकसारंगः सुतंतुस्तंतुवर्द्धनः ॥ इंद्रकर्मा महाकर्मा कृतक
र्मा कृतागमः ॥८४॥ शोभनैरंगैर्ध्येयत्वाच्छुभांगः ॥ लोकानां सारं यत्त
त् गृह्णातीति लोकसारंगः ॥ [illegible] प्रजापतिर्लोकानभ्युतप
दित्यादिश्रुतेः ॥ लोकसारः प्रणवः तेन प्रतिपत्तव्य इति वा ॥ पृषोदर
त्वादिति साधुत्वं ॥ शोभनः तंतुर्विस्तीर्णः प्रपंचोस्येति सुतंतुः ॥ तमे
व तंतुं वर्धयति छेदयतीति वा तंतुवर्द्धनः ॥ इंद्रस्येव कर्मेवास्य कर्मेतीं
द्रकर्मा ॥ ऐश्वर्यकर्मेत्यर्थः ॥ महांति वियदादीनि भूतानि कर्मा
णि कार्याण्यस्येति महाकर्मा ॥ कृतमेव न कर्तव्यं किंचिदपि क
र्मास्य विद्यते इति कृतकर्मा ॥ धर्मात्मकं कर्म कृतवानिति वा ॥
कृतः वेदात्मकः आगमो येनेति कृतागमः ॥ अस्य महतो भूतस्येत्यादि
श्रुतेः ॥८५॥ उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः ॥ अर्को वाज

सनः शृणी जपेतः सर्वविज्जयी ॥८५॥ उत्कृष्टतमं वंजन्मस्येच्छया मङ्गमद
स्कंद्रवः ॥ अपवर्गं तं जन्मास्य सर्वकारणत्वादिति चो द्भवः ॥८०॥ विश्वा
तिशय लोभा ग्र्यपृष्ठानि त्वौ सुंदरः ॥ सुलु दंती ति सुंदः ॥ आर्द्र आवस्य
वाचकः ॥ करुणाकुरद स्वधः ॥ पूर्वोदरादित्वात्पर रूपत्वं ॥ रत्नेश
हुनश्वाना लक्ष्य नेः ॥ रत्नं वत्सुंदरा नाभिरस्येति रत्नं नाभः ॥ अक्षोभ
नं लोचनं नेनयत्नं ज्ञानं वास्येति सुलोचनः ॥ ब्रह्मादिभिः पूज्यतमे मूर्च
नीयत्वा दर्कः ॥ वाजमन्नममृतं नां सनोतीति ददातीति वाजसनः ॥ प्रल
याब्धसिन्धु भगवान् मत्स्यविशेषरूपी शृंगी ॥ मत्वर्थी योऽतिशायिनो
अशेतनिशायेन जयति जयहेतुर्जयंतः ॥ सर्वविषयज्ञानमस्ये
ति सर्ववित्तस्य ॥ अंतराननुरागादिनवा ह्याने हिरण्याक्षादीन् श्च
जेतुं शीलमस्येति जयी ॥ तद्धीले मितलविफा जिष्णोसाः प्राति
निवर्त्यने निद्रि स्वपवः ॥ सूर्यवि श्वा सोजयी च ये कनाम ॥८५॥ ५१
निवर्त्यनो नि निद्रस्वपवः ॥ सर्ववागीश्वरेश्वरः ॥ महाह्रदो महागर्तो मु
सुवर्णविदुरस्योऽस्यः सर्ववागीश्वरेश्वरः ॥ महाह्रदो महागर्तो मु
लोभ्ये तो महानिधिः ॥८८॥ बिंदवः अवयवाः सुवर्णसदृशा अस्य

KKSU LIBRARY
RAMTEK
441 106
M-1553
Dist. Nagpur

॥ सुवर्णबिंदुः॥ आप्रनखात्सर्व एव सुवर्ण इति श्रुतेः॥ शोभनो वर्णो
ऽक्षरं बिंदुश्च यस्मिन्मंत्रे स मंत्रात्मा वा सुवर्णबिंदुः॥ ७००॥ इति नाम्नां
शतं अष्टमं विवृतं॥ स्तनलोभेन कु हा त्रिलोकध्वंसिना
हुश्च तु वेदवीरारिहासुंदराभ्यां रागद्वेषादिभिः शब्दादिविषयैश्च
त्रिदशारिभिश्च न क्षोभ्यत इत्यक्षोभ्यः॥ सर्वेषां वागीश्वराणां ब्र
ह्मादीनामपीश्वरः सर्ववागीश्वरेश्वरः॥ अगाधसदानंदे विश्रम्य स्थद
सुखमासते योगिन इति महाह्रदः॥
गर्तवद्दुस्तरा माया महती दुरत्ययेति महागर्तः॥ मम माया दुरत्ययेति भ
गवद्वचनात्॥ यद्वा गर्तशब्दो रथपर्यायो नैरुक्तैः स्मृतः स महारथोऽस्यैते
महागर्तः॥ महारथत्वमस्य प्रसिद्धं भारतादिषु॥ कालत्रयान
वच्छिन्नस्वरूपत्वान्महाभूतः॥ सर्वभूतानि यस्मिन्निधीयंते म
ही चास्य सा निधिश्चेति महानिधिः॥ ७८०॥ कुमुदः कुंदरः कुंदः
पर्जन्यः पवनोऽनिलः॥ अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः॥ ८०॥

102

५२

कुं धरणीं भारावतरणं कुर्वन् मोदयतीति कुमुदः ॥ कुंदरचांतर्णिणि
जर्यः ॥ कुंद पुण्यतुल्यानि शुद्धानि फलानि राति ददातीति लेसाद तद् ति २
तिवा ॥ रलयोरैक्ये कल्वै से कल्व [illegible] स्मरणात् कुंदरः ॥ कुं धरा
धारयामास हिरण्याक्षं जिघांसया ॥ वाराहरूपमाध्यायेति कुंद
रः ॥ कुंदोपमसुंदरांगत्वात् स्वच्छतया स्फटिकनिर्मलः कुंदः ॥ कुं पृथ्वीं
कश्यपाय प्रददातीति वा कुंदः ॥ सर्वपापविशुद्ध्यर्थं वाजिमेधेन चैव
पूर्वान् ॥ तस्मिन् यज्ञे महादाने दक्षिणां भृगुनंदनः ॥ मारिचाय ददौ
प्रीतः कश्यपाय वसुंधरामिति हरिवंशे ॥ कुं पृथ्वीं खंडयतीति
वा कुंदः ॥ कुं धाकुंत पृथ्वी चरालक्ष्यते ॥ निःक्षत्रियायश्चकार य५
मेदिनीमनेकशो बाहुवन यध्याछिनत्तगपः कार्तवीर्यस्य समा
गतो न मदति श्री विष्णुधर्मे ॥ पर्जन्यवदाध्यात्मिकादितापप्रताप ५२
मवयतिसर्वान्कामानभिवर्षयतीति वा पर्जन्यः ॥ स्मृतिमात्रेण पुना
तीति पावनः ॥ इलतिप्रेरणं करोतीति इलस्तद्रहितत्वादनिलः ॥

इलति स्वपितीति इलः [illegible] स्वद्विपर्याप्तः ॥ निलप्रबुद्धस्वरूपत्वाद्वा अ
निलः ॥ अ[illegible] वानिलो द्वलनाश्चर्यस्व प्रसयां तादृक्षः ॥ गहनो निलः ॥
स्वात्मानं रसामृतमश्नातीति अमृताशः ॥ मथित्वामृतं सुरान्पाय
यित्वा स्वयं चाश्नातीति वामृताशः ॥ अमृता अनश्वरफला दाशा
वांछास्येति वा ॥ मृतं मरणं तद्रहितं वपुरस्येत्यमृतवपुः ॥ सर्वं जाना
तीति सर्वज्ञः ॥ यः सर्वज्ञः सर्वविदिति श्रुतेः ॥ सर्वतोऽक्षिशिरोमुखमि
ति भगवद्वचनात् सर्वतोमुखः ॥ ८० ॥ सुलभः सुव्रतः सिद्धः शत्रुजि
च्छत्रुतापनः ॥ न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ ८१ ॥
पत्रपुष्पफलादिभिर्भक्तिमात्रसमर्पितैः सुखेन लभ्यत इति सुलभः ॥
पत्रेषु पुष्पेषु फलेषु तोयेष्व-क्रीतलभ्येषु सदैव सत्सु ॥ भक्त्येकल
भ्ये पुरुषे पुराणे मुक्त्यै कथं न क्रियते प्रयत्नैः इति महाभारते ॥ शो
भनं व्रतं यस्य [illegible] भोजनान्निवर्तत इति वा सुव्रतः ॥ अनन्याधी
नसिद्धत्वात् सिद्धः ॥ सुरशत्रवं [illegible] स्वपक्षात्रवैस्तान्जयतीति शत्रुजि
त् ॥ [illegible] तापनः सुरशत्रूणां शत्रुतापनः ॥ न्यक् अवाक् रोहतीति स

वैषांमुपरि वर्त्तत इति न्यग्रोधः पृषोदरादित्वात् हकारस्य धकारादे
शः ।। सर्वाणि भूतानि न्यक्कृतानि यमावृणोति निरुणद्धीति वा न्य
ग्रोधः ।। अंबरादुद्भवः कारणत्वेनेत्युदुंबरः ।। पृषोदरादित्वाद्दको
कारादेशः ।। यद्वोदुंबरमन्नाद्यं तेन सदात्मनाद्धयनेवयन्नु
दुंबरः ।। ऊर्ज्ज अन्नाद्यमुदुंबरमिति श्रुतेः ।। श्वोस्थास्यति
इत्यश्वत्थः ।। पृषोदरादित्वाद्थवसकारस्य तकारादेशः ।। ऊर्ध्व
मूलोवाक्शाख एषोश्वत्थः सनातन इति श्रुतेः ।। ऊर्ध्वमूल
मधःशाखमश्वत्थं प्राहुरव्ययमिति ।। स्मृतेश्च ।। चाणूरनामा
नमन्ध्रं निषूदितवान् इति चाणूरान्ध्रनिषूदनः ।। ८८ ।। सहस्रा
र्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।। अमूर्त्तिरनघोऽचिंत्यो
भयकृद्भयनाशनः ।। ८९ ।। सहस्राणि अनंतानि अर्ची
षि यस्य सहस्रार्चिः ।। दिवि सूर्यसह[illegible]स्यस्ये[illegible]त्यादिगीता
वचनात् ।। सप्तजिह्वाः अस्य संतीति सप्तजिह्वः ।। कालीकरा

ली। च मनोजवा च सुलोहिता या। च सुधूम्रवर्णा स्फुलिं-
गिनी विश्वरूपी च देवी लेलायमाना इति सप्त जिह्वा॥ इ-
ति श्रुतेः॥ सप्तैधा सि दीप्तयोस्येति सप्तैधा अग्निः॥ सप्त
ते अग्ने: समिधः सप्त जिह्वा इति मंत्रवर्णात्॥ सप्ताश्वो वाहना-
न्यस्येति सप्तवाहनः॥ सप्तनामैकोश्वो वाहनमस्येति वा॥ एको अ-
श्वो वहति सप्तनामेति श्रुतेः॥ मूर्तिर्धनरूपधारणसमर्थचराच-
रालक्षणानाम्योम्नि तस्याम्यो मूर्तिरजायतेति श्रुतेः॥ तदितरस्य
मूर्तिः॥ अथवा देहसंस्थानलक्षणा मूर्तिर्ना॥ वायुयथा मूर्तिस्तस्य हि
तरस्यामूर्तिः॥ ३०॥ अनघः दुःखं चे पापं च अघं यस्य न विद्यते इत्यन-
घः॥ प्रमात्रादिसाक्षित्वेन सर्वप्रमाणागोचरत्वादचिंत्यः॥ अय-
मीश्वर ईदृश इति विश्वप्रपंचविलक्षणत्वेन चिंतयितुमशक्यत्वा-
दचिंत्यः॥ असन्मार्गवर्तिनां भयं करोतीति भक्तानां भयं कृंतती-
ति भयकृत्॥ वर्णाश्रमाचारवर्तिनां भयं नाशयतीति भयनाशनः॥
वा

106

वर्णाश्रमाचारवता पुरुषेण परः पुमान् ॥ विष्णुराराध्यते पंथा नान्य-
स्तत्तोषकारकः ॥ इति पराशरवचनात् ॥ अणुर्बृहत्कृशस्थूलो गुणभृ-
न्निर्गुणो महान् ॥ अधृतः स्वधृतः स्वास्यप्राग्वंशो वंशवर्द्धनः ॥९०॥
सौक्ष्म्यातिशयशालित्वादणुः ॥ एषोणुरात्मा चेतसा वेदितव्य इति श्रु-
तेः ॥ बृहत्वाद्बृंहणत्वाच्च ब्रह्म बृहत् ॥ महतो महीयानिति श्रुतेः ॥
अस्थूलमनण्वित्यादिना प्रतिषेधात्कृशः ॥ स्थूल इत्युपचर्यते
सर्वात्मत्वात् ॥ सत्त्वरजस्तमसां सृष्टिस्थितिलयकर्मस्वधि-
ष्ठातृत्वाद्गुणभृत् ॥ परमार्थतो गुणाभावान्निर्गुणः ॥ केवलो नि-
र्गुणश्चेति श्रुतेः ॥१४॥ शब्दादिगुणरहितत्वान्निरतिशयसू-
क्ष्मत्वान्नित्यशुद्धबुद्धसर्वगतत्वादिप्रातिबंधकं कर्मजातं न कु-
नापि वर [illegible] मतः एवं महान् ॥ अशक्तो स्पर्शश्च महाधृ-
तिरिति [illegible] नापस्तंभः ॥ पृथिव्यादीनां धारकाणामपि धारकत्वा-
त्केनाप्यधृत इत्यधृतः ॥ यद्येवं केन धार्यत इत्याशं-
क्याह ॥ स्वेनात्मनैव धार्यत इति स्वधृतः ॥ स भगवान् कस्मिन्प्रति-

५५

ष्ठित इति स्वे महिम्नीति श्रुतेः ॥ पद्मोदरदलताम्रमधिरूपमस्या
स्तीति स्वास्यः ॥ वेदार्थको महाञ्छब्दराशिरस्य मुखान्निर्गतः पु
रुषार्थोपदेशार्थमिति वा स्वास्यः ॥ अस्य महतो भूतस्येत्यादिश्रु
तेः ॥ अन्यस्य यज्ञिनो वंशाः पश्चात्सः अस्य वंशः प्रपंचः ॥ प्रा
गेव न पश्चादिति प्राग्वंशः ॥ वंशं प्रपंचं वर्धयत्युच्छेदयच्चा
वंशवर्द्धनः ॥ ९० ॥ भारभृत्कथितो योगी योगीशः सर्वकामदः
॥ आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ ९१ ॥ अनन्तादि
रूपेण भूभारं बिभर्तीति भारभृत् ॥ वेदादिभिरयमेव परमा
त्मेन कथितः ॥ सर्वैरेणं कथित इति वा कथितः ॥ सर्वे वेदा यत्प
दमामनन्ति ॥ वेदे रामायणे पुण्ये भारते भरतर्षभ ॥ आदौ मध्ये
तथा चान्ते विष्णुः सर्वत्र गीयत इत्यादिव्यासवचनेभ्यः ॥ सो
ऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति श्रुतेः ॥ किं तदध्वना
विष्णोर्व्यापनशीलस्य का [illegible] तत्परमं पदमित्यादि ॥ विष्णोः यंतत्व

मिस्याकूस्थायामीन्द्रियादिभ्यः सर्वेभ्यः परह[illegible]प्रातमाय तेभ्य इंद्रियेभ्यः
पराह्यर्था इत्यादिश्रुत्या पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिरित्संतेन
यः कुर्वीत ॥ योगो ज्ञानं तेनैव गम्यत्वान् योगी योगः समाधिः सहि स्वात्म
नि सर्वेदा समाधत्ते स्वमात्मानं तेन वा योगी ॥ अन्ये योगिनो योगान्
नयेहं ॥ ते स्वरूपात्प्रमाद्यंते अयं तु न प्रतिहि तत्त्वात् तेषामीशः यो
गीशः ॥ ५० ॥ सर्वान्कामानू ददातीति सर्वकामदः ॥ फलवत्तरुपप
त्तरितिभगवता व्यासेनाभिहितत्वात्तद् ॥ आश्रमवत्सर्वेषां संसारार
ण्ये भ्रमतां विश्रामस्थानत्वात् आश्रमः ॥ अविवेकिनः संतापयतीति श्र
मणः ॥ क्षामः क्षाणाः सर्वाः करोतीति क्षामः ॥ तत्करोति तदाचष्ट इति
णिचि पचाद्यचि कृते संपन्नः क्षाम इति ॥ छंदोजातानि पर्णानि छंदांसि
संसारतरुरूपेणास्थित इति सुपर्णः ॥ छंदांसि यस्य पर्णानीति भगवद्व
चनात् ॥ वायुर्वहति यद्भीषा भूतानीति स वायुवाहनः ॥ भीषास्मा
द्वातः पवते इति श्रुतेः ॥ ६१ ॥ धनुर्धरो धनुर्वेदो दंडो दमयिता दमः ५५
॥ अपराजितः सर्वसहो नियंता नियमो यमः ॥ ६२ ॥ रामो धनुः श्रीमा

१०९

न्धारयामासेति धनुर्धरः ॥ स एव दाशरथिर्धनुर्वेदं वेत्तीति धनुर्वे
दः ॥ दमनं दमयतां दंडः ॥ दंडो दमयतामस्मीति भगवद्वचनात् ॥ वैव
स्वतनरेंद्रादिरूपेण प्रजा दमयतीति दमयिता ॥ दमः ॥ दम्येषु दंडकार्यं
फलं तच्च स एवेति दमः ॥ शत्रुभिरपराजित इत्यपराजितः ॥ सर्वकर्म
सु समर्थ इति सर्वसहः ॥ सर्वाञ्छत्रून्सहत इति वा सर्वसहः ॥ स
र्वान्स्वेषु कृत्येषु व्यवस्थापयतीति नियंता ॥ नियमो नियतिरस्य
विधिस्तद्धस्त नियमः ॥ सर्वं नियंतु नियंतं तस्याभावात् ॥ नास्य विद्य
ते यमो मृत्युरित्ययमः ॥ अथवा यमनियमौ योगांगोक्तौ तद्रूपत्वाद्वा
एव नियमो यमः ॥ ९२ ॥ सत्ववान्सात्विकः सत्यः सत्यधर्मपराय
णः ॥ अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ॥ ९३ ॥ शौर्यादि
कं सत्वमस्यास्तीति सत्ववान् ॥ सत्वगुणे प्राधान्येन स्थित इति सात्वि
कः ॥ सत्सु साधुत्वात्सत्यः ॥ सत्यं यथाभूतार्थकथनं धर्मश्चोदना
लक्षणो नियत इति सत्यधर्मपरायणः ॥ ७० ॥ अभिप्रयते पुरुषा
र्थकांक्षिभिरभिमुख्येन प्रलये यस्मिन्नेति जगदिति वा

भिप्रायः ॥ प्रियाणि इष्टान्यर्हतीति प्रियार्हः ॥ यद्यद्दिष्टतमं लो
के यच्चास्य दयितं गृहे ॥ तत्तद्गुणवते देयं तदेवाक्षयमिच्छतेति
स्मरणात् ॥ स्वागतासनप्रश्नसार्घ्यस्तुतिनमस्कारादिभिः पू
जासाधनैः पूजनीय इत्यर्हः ॥ न केवलं पूजार्ह एव स्तुत्यादिभिः
भजतां प्रियं करोतीति प्रियकृत् ॥ तेषामेव प्रीतिं वर्धयन् प्रीति
वर्धनः ॥ ७४ ॥ विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ॥ र
विर्विरोचनः सूर्यः सविता रविलोचनः ॥ ७५ ॥ विहायसग
तिराश्रयोस्येति विहायसगतिः ॥ विष्णुपदमादित्यो वास्वयमेव
द्योतत इति ज्योतिः ॥ नारायणपरं ज्योतिरिति मंत्रवर्णात् ॥ शोभना
रुचिर्दीप्तिरिच्छा वास्येति सुरुचिः ॥ समस्तदेवतोद्देशेन प्रयुक्ते
ष्वपि कर्मसु हुतं भुङ्क्ते भुनक्तीति वा हुतभुक् सर्वत्र वर्तमानः ॥ त्र
याणां लोकानां विभुत्वाद्वा विभुः ॥ रसमादत्ते इति रविरादित्यात्मा ॥ ५८
विविधं रोचत इति विरोचनः ॥ सूते श्रियमिति सूर्योऽग्निर्वा ॥ सू
र्यशब्दो निपात्यते ॥ राजसूयसूर्येत्यादिपाणिनिवचनात् ॥ सर्व

स्य जगतः प्रसविता सविता ॥ रसानां चादाता रविः रश्मिभिः पु
ते ॥ प्रजानां त्वं प्रसवनात्सवितेति निगद्यते इति विष्णुधर्मोत्तरे
॥ रविर्लोचनं चक्षुरस्येति रविलोचनः ॥ अग्निर्मूर्धा चक्षुषी
चंद्रसूर्याविति श्रुतेः ॥९४॥ अनंतो हुतभुग्भोक्ता सुखदो नैक
जो ग्रजः ॥ अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥९५॥
नित्यत्वात्सर्वगतत्वाद्देशकालपरिच्छेदाभावादनंतः ॥ शेषरूपो वा ॥
हुतं भुंक्त इति हुतभुक् ॥ प्रकृतिं भोग्यामचेतनां भुंक्ते इति भोक्ता ॥
जगत्पालयतीति वा भोक्ता ॥ भक्तानां सुखं मोक्षलक्षणं ददा
तीति असुखं खंडयतीति वा सुखदः ॥ धर्मगुप्तये सकृज्जा
यमानत्वादनेकजः ॥९०॥ अग्रे जायत इत्यग्रजः ॥ हिर
ण्यगर्भः ॥ हिरण्यगर्भः समवर्तताग्रे इति श्रुतेः ॥ अ
वाप्तसर्वकामत्वात्प्राप्तिहेत्वभावान्निर्वेदस्य नास्ती

५८

तिअनिर्विण्णः॥साधूनूसततः आभिमुख्येन मृष्यते क्षमतइ
तिसदामर्षी॥तमनाधारमाधारमधिष्ठायत्रिलोकीति
ष्ठतीति लोकाधिष्ठानं ब्रह्म॥अद्भुतत्वादद्भुतः॥आश्चर्य
वत्पश्यति कश्चिदेनमिति भगवद्वचनात्॥स्वरूपशक्तिव्या
पारकार्यैरद्भुतत्वाद्वा अद्भुतः॥९५॥सनात्सनातनतमः कपि
लः कपिरव्ययः॥स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्व
स्तिदक्षिणः॥९६॥सनादिति चिप्रः॥चिरार्थवचनः कालः
परस्यैव विकल्पना॥परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज॥
व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथापरमिति श्रीविष्णुपुरा
णे॥सर्वकारणत्वादिनामपि सनातननाना सनातनत्वात्सनात
नतमः॥वडवानलस्य कपिलो वर्ण इति तद्रूपी कपिलः॥क ५८
जलरसमग्निपीबतीति कपिः॥कपिर्वराहः श्रेष्ठश्चेति भग

113

वेदुचेनात्तः ॥ व्ययप्रत्ययोपि नंव्येत्तिद्रस्वव्ययः ॥ ७० ॥ इतिना
म्नामेवमंशातेविरुन्ते ॥ मंरक्षानामंगलेदानीतिस्वस्तिदः ॥
नेदेवंकुरोतीति स्वस्तिकृत् ॥ मंगलस्वरूपमात्मीयपरमानं
दलेशस्य स्वस्तिः ॥ तंदेवंभुंक्तेइति स्वस्तिभुक् ॥ मंरक्षानामंग
ले स्वस्तिभुनक्तीति स्वस्तिभुक् ॥ स्वस्तिरूपेण दक्षते वर्ध
ते स्वस्ति स्वधातुसमर्थे इतिया स्वस्तिदक्षिणः ॥ अथवा
दक्षिणशब्दः आशुकारिणि वर्त्तते शीघ्रं स्वस्तिदानमयमे
व समर्थः ॥ यस्य संस्मरणादेव सिध्यंति सर्वसिद्धयः ॥ स्मृ
तेः सकलकल्याणभाजनं यत्र जायते ॥ पुरुषस्तमजं नि
त्यं व्रजामि शरणं हरिं ॥ स्मरणादेव कृष्णस्य पापसंघात
पंजरं ॥ शतधा भेदमायाति गिरिर्वज्रहतो यथा ॥ सादिवे
पमेभ्यः ॥ ९८ ॥ अरौद्रः कुंडली चक्री विक्रम्यूर्जितशास

114

नः॥ शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः॥१७॥ अ
वाप्तसर्वकामत्वेन रागद्वेषादेरभावादक्रूरः॥ क्षोभरूपमा
कृ॥ कुंडली॥ यद्वा सांख्ययोगात्मके कुंडले मकराकारे अस्या
स्तीइति कुंडली॥ क्षोभरूपो हरिः॥ चक्री च॥ विक्रमः पदवि
क्षेपः सोस्यास्तीति विक्रमी॥ अक्षोभरूपेभ्यो विलक्षणम
स्यातीति विक्रमी॥ श्रुति नमस्काराणां चोर्जित तश्वासनं नम
स्यति ऊर्जित तश्वासनः॥ श्रुतिः स्मृतिर्मे वाणी उल्लघ्य
परिवर्तते॥ आज्ञाच्छेदी मम द्रोही मद्भक्तो न च वैष्णव इति भ
गवद्वचनात्॥ [illegible]॥ शब्दप्रवृत्तिहेतूनां जात्यादीनामसंभ
वात्॥ शब्देन वक्तुमशक्यत्वाच्छब्दातिगः॥ यतो वाचो निवर्तं
ते अप्राप्य मनसा सह॥ न शब्दगोचरं यस्य योगिध्येयं परं
पदमित्यादिश्रुतिस्मृतिभ्यः॥ सर्वे वेदाः तात्पर्येण वदन्ती

तिशब्दसहः॥ सर्वे वेदाः यत्पदमामनंति॥ वेदैश्च सर्वैरहमेव
वेद्य इत्यादि स्मृतिभ्यः॥ तापत्रयाभितप्तानां विश्राम
स्थानत्वात् शिशिरः॥ संसारिणां या शर्वरी ज्ञानिनां संसार
शर्वरी तामुभयेषां करोतीति शर्वरीकरः॥ या निशा सर्वभू
तानां तस्यां जागर्ति संयमी॥ यस्यां जाग्रति भूतानि सा नि
शा पश्यतो मुनेरिति भवद्वचनात्॥ ॥९७॥ अक्रूरः पेशलो
दक्षो दक्षिणः क्षमिणांवरः॥ विद्वत्तमो वीतभयः पुण्यश्रव
णकीर्तनः॥९८॥ क्रौर्यं नाम मनोधर्मः॥ कोपजः अंतरसं
तापः॥ स्वाभिनिवेशः अवाप्तः सर्वकामत्वात् कामाभावे क्रौर्या
भावः॥ तस्मात् क्रौर्यमस्य नास्तीत्यक्रूरः॥ कर्मणा मनसा वा
चा वपुषा च शोभनत्वात् पेशलः॥ प्रवृद्धिशक्तिः शीघ्रकारि
समर्थ इति दक्षः विशेषणमेवं चेत्तरमेतस्मिन्नियत इति द

मः ॥ दाक्षिणशब्दस्यापि दक्ष एवार्थः ॥ पुनरुक्तिभेदो नास्ति शब्दभेदात्
अथवा दक्षते गच्छति हिनस्तीति वा दक्षिणः ॥ दक्ष गतिहिंसयोरिति
धातुपाठात् ॥ क्षमावतां योगिनां पृथिव्यादीनां भारधारकाणां श्रेष्ठ इति
क्षमिणांवरः ॥ क्षमया पृथिवीसमः इति व्यासवचनात् ॥ ब्रह्माण्डमखिलं
वहन्न पृथिवी भारेण नार्दितः इति पृथिव्याः अपि वरः ॥ क्षमि
णां शक्तानां यतः सर्वशक्तिमत्वात् सकलाः क्रियाः कर्तुं क्षमत
इति क्षमिणांवरः ॥ निरस्तातिशयं ज्ञानं सर्वदा सर्वगोचरमस्या
स्तीति नेतरेषामिति विद्वत्तमः ॥ २० ॥ वीतं विगतं भयं सांसारिकं संसा
रलक्षणमस्येति वीतभयः ॥ सर्वेश्वरत्वान्नित्यमुक्तत्वाच्च ॥ पुण्यं
पुण्यकरं श्रवणं कीर्त्तनं चास्येति पुण्यश्रवणकीर्तनः ॥ यइदं शृणु
यान्नित्यमिति श्रवणफलवचनात् ॥ ९८ ॥ उत्तारणो दुष्कृतिहा
पुण्यो दुःस्वप्ननाशनः ॥ वीरहा रक्षणः सन्तो जीवनः पर्यवस्थि
तः ॥ ९९ ॥ संसारसागरादुत्तारयतीत्युत्तारः ॥ दुष्कृतिः पापसंज्ञि

५८

तां हंतीति दुष्कृतिहा ॥ स्मरणादि कुर्वतां पुण्यं करोतीति सर्वे
षां स्मृतिलक्षणया वाचा पुण्यमाचष्ट इति वा पुण्यः ॥ भाव
नोर्थस्य सूचकान् दुःस्वप्नान्नाशयतीति दुःस्वप्ननाशनः ॥
विविधाः ससारिणां गतीर्मुक्तिप्रदानेन हंतीति वीरहा ॥ सत्व
गुणमधिष्ठाय जगत्रयं रक्षन् रक्षणः ॥ नद्यादित्वात्कर्तरियु
कू ॥ सन्मार्गवर्तिनः संतः तद्रूपेण विद्याविनयवृद्धये स एव
वर्तत इति संतः ॥ प्राणरूपेण जीवयन् जीवनः ॥ ३० ॥ परितः सर्व ८०
तो विश्वं व्याप्य वस्थित इति पर्यवस्थितः ॥ ३१ ॥ अनंतरूपो
नंतश्रीर्जितमन्युर्भयापहः ॥ चतुरस्रो गभीरात्मा विदिशो
व्यादिशो दिशः ॥ ७०० ॥ अनंतादिरूपेण विश्वपुण्यरूपेण स्थि
त अनंतरूपः ॥ अनंताः अपरिमिताः परमा श्रीरस्येत्यनं
तश्रीः ॥ परास्य शक्तिर्विविधा ॥ जीतः मन्युर्येन स जितमन्युः ॥

अन्यो धाता नास्तीति भयापहः ॥ न्यायसमवेतश्चतुरस्त्रोऽपिसदृ
ति ॥ प्रसयाभोसस्वरूपफलं प्रयच्छतीति वा ॥ विविधानि फलान्यधि
कारिभ्यो यच्छोवणादिशनीति विदिशः ॥ विविधाभासी शक्रादीन्
कार्यानु समस्तानां कर्मिणां कर्मफलं दिशानु व्यादिशः ॥१००॥ अ
नादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः ॥ जननो जनजन्मादि
र्भीमो भीमपराक्रमः ॥१०१॥ आदिकारणमस्य न विद्यत इत्यना
दिः ॥ भूराधारः कसर्वकारणत्वात्तु ॥ भुवः सर्वभूताश्रयत्वेन प्र
सिद्धापा भूवो भूर्भुवः ॥ अथवा न केपलं मस्यै भूर्भुवो लक्ष्मीः
शोभा चेति भुवो लक्ष्मीः ॥ अथवा भूर्भुवो लोकः भुवो भुवर्लो
कस्तयो लक्ष्मीः ॥ आत्मविद्या ॥ आत्मविद्या च देवि त्वमिति श्रा ८०
स्मृतेः ॥ भूम्यंतरिक्षयोः शोभेति वा भूर्भुवो लक्ष्मीः ॥ शोभना
विविधा ईरा गतयो यस्य स सुवीरः ॥ शोभनं विविधं ईरणमस्ये

त्रियासुवीरः ॥ रुचिरे कल्याणे अंगदे अस्येति रुचिरांगदः
॥ जन्तून् जनयन् जननः ॥ ल्युटो बहुलग्रहणात् ॥ कर्त्तरि ल्युट्
॥ जनस्य जनिमतो जन्म उद्भवस्तस्यादिमूलं कारणमिति जन
जन्मादिः ॥ भयहेतुत्वाद्भीमः ॥ भीमादयोपादाने इति पाणिनिवच
नात् ॥ महद्भयं वज्रमुद्यतमिति मंत्रवर्णात् ॥ असुरादीनां भयहे
तुः पराक्रमोस्यावतारेष्विति भीमपराक्रमः ॥१०१॥ आधार
निलयो धाता पुष्पहासः प्रजागरः ॥ ऊर्ध्वगः सत्पथाचारः प्राण
दः प्रणवः प्रणः ॥१०२॥ पृथिव्यादीनां पंचभूतानामाधाराणा
मधारत्वादाधारनिलयः ॥ स्वात्मनाधृतस्यास्यान्यो धाता ना
स्तीत्यधाता ॥ नपूर्वस्येति अधृतस्येति समासांतविधिरनित्य
इति कप्रत्ययाभावः ॥ संसारसमये सर्वाः प्रजाः धारयति ॥ धयति
पीबति रश्मिवा धाता धेयारवेति धातुः ॥१०॥ मुकुलात्मनो पुष्पा

नांतासांवत्फलानांतासांयत् प्रपंचरूपेणविकासोस्येतिपुष्पहासः॥
नित्यप्रबुद्धस्वरूपत्वात्प्रकर्षेणजागर्त्तीतिप्रजागरः॥ सर्वेषांउ
परिस्थितत्वादूर्ध्वगः॥ सत्पथमाचरतीतिसत्पथाचारः॥ प्राणा
कारप्रभृतीन्जीवयन्नीतिप्राणदः॥ प्रणवोनामपरमात्मनोवा
चकः ॐकारः॥ तदभेदोपचारेणायंप्रणवः॥ पणान्व्यवहर्तापार्थि
न्कुर्वन्पणः॥ सर्वाणिरूपाणिविचिंत्यधीरोनामानिकृत्वाभिवद
न्यदास्तेइतिश्रुतेः॥ पुण्यानिकर्माणिफलैःसगृह्ययोग्याधिकारिभ्यस्त
त्फलंप्रयच्छन्तल्लक्षणयाइतिवा॥१०२॥ प्रमाणंप्राणनिलयःप्रा
णभृत्प्राणजीवनः॥ तत्त्वंतत्त्वविदेकात्माजन्ममृत्युजरातिगः॥१०३॥
प्रमितिःसंवित्स्वयंप्रभाप्रमाणं॥ प्रज्ञानंब्रह्मेतिश्रुतेः॥ ज्ञानस्वरूपमत्य
न्तनिर्मलंपरमार्थतः॥ तदेवार्थस्वरूपेणभ्रांतिदर्शनतःस्थितमिति ६१
श्रीविष्णुपुराणे॥ प्राणानींद्रियाणियत्रजीवोविलियतेतत्परंतत्रेवा
नर

इत्यधारकः प्राणापानादयो यस्मिन्नालीयन्ते प्राणनि इति ॥
प्राणो जीवः पुरे पुंसि नि[illegible]लीयते इति वा ॥ प्राणान् जीवोऽस्य संहरन्नि
ति वा प्राणनिलयः ॥ पोषयन्नन्नरूपेण प्राणान् प्राणभृत् ॥ प्राणानु
प्राणिनो जीवयतीति प्राणजीवनः ॥ प्राणिनो जीवयन् प्राणा प्राणाख्यै
पवनैरिति प्राणजीवनः ॥ न प्राणेन नापानेन मर्त्यो जीवति कश्चन इ
तरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ इति मन्त्रवर्णात् ॥ तत्त्वममृ
तं सत्यं परमार्थः सतत्त्वमित्येते एकादशार्थवाचिनः परमार्थस
तो ब्रह्मणो वाचकाः शब्दा इति ॥ तत्त्वं ॥ तत्त्वं स्वरूपं यथावद्वेत्तीति
तत्त्ववित् ॥ आत्मा वा इदमेक एवाग्र आसीदिति श्रुतेः ॥ एकश्चात्मेति यदा
दत्ते यच्चात्ति विषयानिह ॥ यच्चास्य सततो भावस्तस्मादात्मेति गीय
त इति श्रुतेः ॥ अस्ति जायते वर्धते विपरिणमते अपक्षीयते विन
श्यतीति षड्भावविकारान् अतीत्य गच्छतीति जन्ममृत्युजरातिगः ॥ न
जायते म्रियते वा विपश्चिदिति मन्त्रवर्णात् ॥१०३॥ भूर्भुवः स्वस्तरु

स्तारः सविता प्रपितामहः॥ यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः॥७॥
भूर्भुवः स्वः समारव्यानि त्रीणि व्याहृतिरूपाणि त्रयीसाराणि ब्रह्मा
आहुः तैर्होमादीनां जगत्त्रयं तरते पूर्वते चेति भूर्भुवः स्वस्तरुः॥ अ
ग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते॥ आदित्याज्जायते वृष्टिर्वृष्टे
रन्नं ततः प्रजाः इति मनुवचनात्॥ अथवा भूर्भुवः स्वस्तरुः समारंभो
लोकत्रयसंसारस्य सो भूर्भुवः स्वस्तरुः॥ लोकत्रयं वृक्षवद्व्याप्यतिष्ठ
तीति वा भूर्भुवः स्वस्तरुः॥ संसारसागरं तारयस्तारः॥ प्रणवो वा॥
सर्वस्य लोकस्य जनक इति सविता॥ पितामहस्य ब्रह्मणोऽपि पितेति प्र
पितामहः॥ यज्ञात्मना यज्ञः॥७०॥ यज्ञानां पतिः स्वामी यज्ञपतिः॥
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति गीतावचनात्॥ यजमा
नात्मना तिष्ठन् यज्वा॥ यज्ञाः अंगान्यस्येति वराहमूर्तिः यज्ञांगः॥ ६२
वेदपादो यूपदंष्ट्रः क्रतुदंतश्चितीमुखः॥ अग्निजिह्वो धर्भरो
मा ब्रह्मशीर्षो महातपाः॥ ॥ अहोरात्रेक्षणो दिव्यो वेदांतश्रुतिभू
षणः॥ आज्यनासः स्रुवस्तुंडः सामघोषः स्वनो महान्॥ ॥

धर्मसंस्थापयः श्रीमानुरुक्रमविक्रमसत्क्रियः ॥ प्रायश्चित्तेन तेघोरः प
श्रुतौ त्रैर्महाभुजः ॥३॥३ ता चौ श्रौ लौ मलिंगः फलंबिज महोषधी ॥
वा तरात्मा मत्रस्फिकृ विकृ तेसोम श्रोणितः ॥४॥ वेदीस्कंधो हवि
गंधा हव्य कव्यातिवेगवान् ॥ प्राग्वंश कायो द्युतिमान्नानी दीक्षा
भिरर्चितः ॥५॥ दक्षिणा हृदयो योगि महामंत्रमयो महान् ॥ उपा
मौष्ठमालिकः प्रवर्ग्यावर्तभूषणः ॥६॥ नानाछंदोगतिपथो गु
ह्योपनिषदासनः ॥ छायापत्नीसहायो वै मेरुशृंग इवोच्छ्रितः ॥
॥७॥ इति श्रीहरिवंशे ॥ फल्गोहे तुभ्यं तान्यस्तान्ध्याहयतीति
यज्ञवाहनः ॥१०४॥ यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाध
नः ॥ यज्ञांतकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥१०५॥ य
ज्ञं बिभर्ति पातीति विधा यज्ञभृत् ॥ यज्ञकृत् ॥ यज्ञी ॥ यज्ञभु
क् ॥ जगदादौ तदंते च यज्ञः साधनं तत्प्रापक इति यज्ञसाधनः ॥

९२

यज्ञस्यांतं फलं प्राप्तिं कुर्वन् यज्ञांतकृत् । पूर्णाहुत्या यज्ञं समाप्तिं
करोतीति वा यज्ञसाधनः ।८०॥ यज्ञानां गुह्यं ज्ञानं यज्ञफलाभि-
सिद्धिरहितो वा यज्ञः ॥ तदभेदोपचारात् ब्रह्म यज्ञगुह्यं ॥ अद्य-
ते अत्ति च भूतानि इत्यन्नं ॥ अन्नमत्तीत्यन्नादः ॥ सर्वं जग-
दन्नादिरूपेणाग्नीषोमात्मकमेवेति दर्शयितुमेवकारः ॥
चशब्दः सर्वनाम्नामेकस्मिन्नुक्तिसमुच्चयत्वेति दर्शयि-
तुं ॥१०५॥ आत्मयोनिः स्वयंजातो वैखानः सामगायनः ॥
देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः ॥१०६॥ आत्मै-
व योनिरुपादानकारणं नान्यदित्यात्मयोनिः ॥ निमित्तकारणम-
पि स एवेति दर्शयितुं स्वयंजात इति ॥ प्रकृतिश्च प्रतिज्ञादृष्टा-
न्तानुपरोधादिसूत्रस्थापितमुभयकारणत्वं हरेः ॥ विशेषेण ९३
खननाद्वैखानः ॥ धरणीं विशेषेण खात्वा पातालतलवासिनं

हिरण्याक्षं वाराहरूपमास्थाय जघानेति पुराणे प्रसिद्धः ॥ सामानि
गायतीति सामगायनः ॥ देवक्याः सुतो देवकीनंदनः ॥ ज्योतींषि शु
क्राणि च यानि लोके त्रयो लोका लोकपालास्त्रयी च ॥ त्रयोग्नय
श्चाहुतयश्च पंच सर्वे देवाः देवकीपुत्र एवेति महाभारते ॥
पनः स्रष्टा सर्वस्य लोकस्य ॥ क्षितेरीशः भूमेरीशः क्षितीशः ॥
दशरथात्मजः ॥९९०॥ पापानि नाशयन् पापनाशनः ॥ कीर्तितो
पूजितो ध्यातः संस्मृतः पापराशिनाशनः ॥ पक्षोपवासाद्यत्पापं पु
रुषस्य प्रणश्यति ॥ प्राणायामसहस्रेण यत्पापं नश्यते नृणां ॥
क्षणमात्रेण तत्पापं हरेर्ध्यानात्प्रणश्यतीति वृद्धशातातपः ॥
॥१०६॥ शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः ॥ रथाङ्ग
पाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥१०७॥ सर्वप्रहरणायु
धः ॐ नम इति ॥१००७॥ पांचजन्याख्यं भूताद्यहंकारात्मकं

शंखंविभर्ती ॥ शंखभृत ॥ विद्यामयो नंदकाख्यो सिरस्येति नंद
की ॥ मनस्तत्वात्मकं सुदर्शनाख्यं चक्रमस्यास्तीति चक्री ॥ इंद्रि
याद्यहंकारात्मकं शार्ङ्गं धनुरस्यास्तीति शार्ङ्गधन्वा ॥ धनुष
श्चेसनङ् समासांतः प्रत्यय ॥ बुद्धितत्वात्मिकां कौमोदकीं नाम
गदांवहन्गदाधरः ॥ रथांगं चक्रमस्यपाणो स्थितं सरथांगपा
णिः ॥ अत एवाक्षोभ्यः क्षोभणाशक्यः ॥ केवलमेतान्येवास्या
युधान्यस्येति नियम्यते अपितु सर्वाण्येव प्रहरणान्यायुधा
न्यस्येति सर्वप्रहरणायुधः ॥ आयुधत्वेनाप्रसिद्धान्यपि कर
जादीन्यस्यायुधानि भवंतीति सर्वप्रहरणायुध इति वचनं ॥
सत्यसंकल्पत्वेन सर्वेश्वरत्वं दर्शयितुं तथैव सर्वेश्वर इति स्मृ
तेः ॥ द्विवचनं समाप्तिद्योतनार्थं ॥ ओंकारश्च मंगलार्थः ॥ ओं
कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ॥ कंठं भित्वा विनिर्या ५
तौ तस्मान्मांगलिकावुभाविति वचनात् ॥ अनेन नमस्कारका
की

नाथं

127

परिचरणं कृतवानिति॥ भूयिष्ठां ते नम उक्तिं विधेमेति श्रुतेः॥
धन्यं तदेव लग्नं सन्नक्षत्रं तदेव पुण्यमहः॥ करणस्य सा
सिद्धिर्यत्र हरिः प्राङ्ग्यमस्तके यतेदलिञ्च॥ प्राप्तिस्थपलक्ष
णो॥ अंतेपि नमस्कारस्य शिष्टैराचरणात्॥ नमस्कारफलं
प्रागेव दर्शितं॥ एकोपि कृष्णस्य कृतः प्रणामो दशाश्वमे
धावभृथेन तुल्यः॥ दशाश्वमेधी पुनरेति जन्म कृष्णप्र
णामी न पुनर्भवाय॥ अतसीपुष्पसंकाशं पीतवाससमच्युतं
ये नमस्यंति गोविंदं न तेषां विद्यते भयं॥ २॥ लोकत्रयाधि
पतिमप्रतिमप्रभावामीशत्प्रणम्य शिरसा प्रभविष्णुमीशं॥
जन्मांतरप्रलयकल्पसहस्रजातमाशु प्रणाशमुपया
ति नरस्य पापं॥ ३॥ इति नाम्नां दशमशतं विवृतं॥ १०७॥
नामसहस्रस्येति॥ इतीदं कीर्तितं यस्य केशवस्य महात्मनः॥
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम्॥ १०८॥

यइदंशृणुयान्नित्यंयश्चापिपरिकीर्तयेत्॥नाशुभंप्राप्नुया
त्किंचित्सोमुत्रेहचमानवः॥१०॥इतीदमित्येतेननामसह
स्रमन्यूनातिरिक्तमितिदर्शयति॥दिव्यानांअप्राकृतानांना
म्नांसहस्रस्यप्रकीर्तिनमितिवदताप्रकारांतरेणविसंख्योपप
त्तिर्दर्शिता॥प्रक्रमेकिंजपन्मुच्यतेजंतुरितिजपशब्दोपादाना
त्कीर्तयेदित्यनेनापित्रिविधोजपोलक्ष्यते॥उच्चोपांशुमान
सलक्षणस्त्रिविधोजपः॥यइदंशृणुयादिवचनेनपरलो
कप्राप्तस्यापिययातिनहुषादिवदशुभमप्राप्त्यभावंसूचयितु
अमूत्रेत्युक्तं॥१०१०॥वेदांतगोब्राह्मणःस्यात्क्षत्रियोवि
जयीरणे॥वैश्योधनसमृद्धःस्याच्छूद्रःसुखमवाप्नुयात्॥११॥
वेदांतोनामयंब्रह्मगच्छत्यवगछेतीतिवेदांतगः॥किंजपन्मु
च्यतेजंतुर्जन्मसंसारबंधनादितिवचनात्॥जपकर्मणासाक्षा ९५
न्मुक्तिशंकायांकर्मणासाक्षान्मोक्षहेतुत्वेनास्तिज्ञानेनैव

मोक्ष इति दर्शयितुं वेदान्तगो ब्राह्मणः स्यादित्युक्तं ॥ कर्मणां त्वे
तः करणशुद्धिद्वारेण मोक्षहेतुत्वे कषायपक्तिः कर्माणि ज्ञाने चे
ज्ञानान्मोक्षोधिगम्यते ॥ योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्ध
ये ॥ कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ॥ तस्मात्कर्म न कुर्वन्
ति यतयः पारदर्शिनः ॥ यथोक्तान्यपि कर्माणि परिहाय द्विजोत्त
मः ॥ आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् इति मानवी ॥ ९६
तपसा कल्मषं हन्ति विद्ययामृतमश्नुते ॥ ज्ञानेन मुक्तस्य च ते पु
सोऽस्य पापस्य कर्मणः ॥ यथादर्शतले प्रख्ये पश्यत्यात्मान
मात्मनि ॥ येन केनापि यज्ञेन देवर्षिलोमेनानुपश्यते मनः ॥१०॥ यत्र
वर्तीसाद्रिस्मृतिभ्यः ज्ञानादेव मोक्षः ॥ ब्रह्मविदाप्नोति परम् ॥ तरति
शोकमात्मवित् ॥ ब्रह्मविद्ब्रह्मैव भवति ॥ ब्रह्मैव सन्ब्रह्माप्येति ॥
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ य
द्वान्न बिभेति कुतश्चन ॥ इह चेदवेदीदथ सत्यमस्ति न चेदिहा

६६

वेदीन्महती विनष्टिः ॥ यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदाशिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥ न कर्मणा न प्रजया
धनेन त्यागेनैके अमृतत्वमानशुः ॥ वेदान्तविज्ञानसुनिश्चि
तार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ॥ ते ब्रह्मलोके तु प
रान्तकाले परामृतात्परिमुच्यन्ति सर्वे इत्यादि श्रुतिभ्यः ॥
शूद्रः सुखमवाप्नुयात् ॥ श्रवणेनैव नतु जपयज्ञेन ॥ तस्मा
च्छूद्रो यज्ञेन च कल्पते इति श्रुतेः ॥ श्रावयेच्चतुरो वर्णानि
ति हरिवंशे ॥ यः ~~शूद्रः शृणु~~ वचनान्महाभारतादिश्रवणे
मनुज्ञायते ॥ पुण्यगतिमियात् श्रवणाच्च शूद्रो निशिरितिहरि
वंशे ॥ यः शूद्रः शृणुयात्स सुखमवाप्नुयादिति वचनेऽहितेन ६९
सर्वेषः ॥१०॥ धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुया
त् ॥ कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाः ॥११॥
भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ॥ सहस्रं वासु

131

देवस्य नाम्नामेतत्प्रकीर्तयेत् ॥११२॥ यशः प्राप्नोति विपु
लं याति प्राधान्यमेव च ॥ अचलां श्रियमाप्नोति श्रेयः प्रा
प्नोत्यनुत्तमं ॥११३॥ न भयं क्वचिदाप्नोति वीर्यं तेजश्च विंद
ति ॥ भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः ॥११४॥ रोगा
र्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनात् ॥ भयान्मुच्येत भीतस्तु
मुच्येतापन्न आपदः ॥११५॥ दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्त
मं ॥ स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥११६॥ वासुदेवा
श्रयो मर्त्यो वासुदेवपरायणः ॥ सर्वपापविशुद्धात्मा याति ब्रह्म सना
तनं ॥ न वासुदेवभक्तानामशुभं विद्यते क्वचित् ॥ जन्ममृत्युजराव्याधिभ
यं नैवोपजायते ॥११८॥ इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ॥ यु
ज्येतात्मसुखक्षांतिश्रीधृतिस्मृतिकीर्तिभिः ॥११९॥ त्रैवर्गिकैः कीर्ति ये
दि सुखे तत्र स्यादीनां मात्सर्ययुक्तेन मनसाधिष्ठितानां विषयेषामनुकू
लापि इति: कामः प्रजाः संततिः भक्तिमात्सर्यादिभक्तिमतः मुख्यः सं
ततमुपयुक्तस्यैकाग्रस्य विशिष्टाधिकारिणः फलविशेषदर्शितो ॥

८७

श्रद्धा आस्तिक्यबुद्धिः भक्तिः भजनं तात्पर्यं ॥ आत्मनःसुखं
आत्मसुखं तेन च क्षांत्यादिभिश्च युक्तेन ॥ न क्रोधो न च मात्स
र्यं न लोभो नाशुभा मतिः ॥ भवंति कृतपुण्यानां भक्तानां
पुरुषोत्तमे ॥ १२० ॥ द्यौः सचंद्रार्कनक्षत्रा खं दिशो भूर्महो
दधिः ॥ [illegible] वासुदेवस्य वीर्येण विधृतानि महा
त्मनः ॥ १२१ ॥ ससुरासुरगंधर्वं सयक्षोरगराक्षसं ॥ जग
द्वशे वर्ततेदं कृष्णस्य सचराचरं ॥ १२२ ॥ इंद्रियाणि मनो
बुद्धिः सत्वं तेजो बलं धृतिः ॥ वासुदेवात्मकान्याहुः क्षे
त्रं क्षेत्रज्ञ एव च ॥ १२३ ॥ नाशुभा इति आकारांतं बंध
रहितेन नकारेण समस्तपदत्रयं क्रोधादयो न भवंति
मात्सर्यं न च भवतीत्यर्थः ॥ द्यौः सचंद्रार्कनक्षत्रेत्यादि ८७

133

नास्तुत्यस्य वासुदेवस्य महात्म्यकथनेनोक्तानां फलानां प्राप्ति
वेचेन यथार्थवक्तेनर्थवाद इति दर्शयति ॥ सर्वागमाना
माचारः प्रथमं परिकल्पते ॥ आचारप्रभवो धर्मो धर्म
स्य प्रभुरच्युतः ॥१२४॥ इसनेनांतरवाक्येन सर्वध
र्माणा आचारमात्रतत्वाधिकारः ॥ दर्शयति ॥ इमस्ता
वमित्यादिना ॥ शास्त्राद्धेया ॥१॥२॥३॥४॥ अतुगोक
टीकामूलपुस्तके गता तथाचेत्को ककर्ता रकोनमुष्यत
व तदिति व्यासवचनेन ॥ ऋषयः पितरो देवा महाभूतानि
धातवः ॥ जंगमाजंगमं चेदं जगन्नारायणोद्भवं ॥१२५॥
योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च ॥ वेदाः
शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥१२६॥

134

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः॥ त्रीन्लोकान्व्या
प्य भूतात्मा भुंक्ते विश्वभुगव्ययः॥१२७॥ इमं स्तवं भगवतो
विष्णोर्व्यासेन कीर्तितं॥ पठेद्य इछेत्पुरुषः श्रेयः प्राप्तिं
सुखानि च॥१२८॥ विश्वेश्वरमजं देवं जगतः प्रभावाप्य
यं॥ भजंति ये पुष्कराक्षं न ते यांति पराभवं॥१२९॥ अर्जुन
उवाच॥ पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम॥ भक्ता
नामनुरक्तानां त्राता भव जनार्दन॥१३०॥ श्रीभगवा
नुवाच॥ यो मां नामसहस्रेण स्तोतुमिछति पांडव॥
सोहमेकेन श्लोकेन स्तुत एव न संशयः॥१३१॥
नमोस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबा
हवे॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधा

९८

135

रिणे नमः ॥१३२॥ नमः कमलनाभाय नमस्ते जलशायि
ने ॥ नमस्ते केशवानंत वासुदेव नमोस्तु ते ॥१३३॥ वासना
द्वासुदेवस्य वासितं भुवनत्रयं ॥ सर्वभूतनिवासोसि वा
सुदेव नमोस्तु ते ॥१३४॥ नमो ब्रह्मण्यदेवाय गोब्राह्मण
हिताय च ॥ जगद्धिताय कृष्णाय गोविंदाय नमो नमः
॥१३५॥ आकाशात्पतितं तोयं यथा गच्छति सागरं ॥ स
र्वदेवनमस्कारः केशवं प्रतिगच्छति ॥१३६॥ एष नि
ष्कंटकः पंथा यत्र संपूज्यते हरिः ॥ कुपथं तं विजा
नीयाद्गोविंदरहितागमं ॥१३७॥ सर्ववेदेषु यत्पु
ण्यं सर्वतीर्थेषु यत्फलं ॥ तत्फलं समवाप्नोति स्तु

६९

त्वा देवं जनार्दनं ॥१३८॥ सो नरः पठते नित्यं त्रिकालं केश
वालये ॥ द्विकालमेककालं वा क्रूरं सर्वं व्यपोहति ॥१३९॥
दह्यन्ते रिपवस्तस्य सौम्याः सर्वे सदा ग्रहाः ॥ विली
यंते च पापानि स्तवे ह्यस्मिन् प्रकीर्तिते ॥१४०॥ येन
ध्यातः श्रुतो येन येनायं पठितः स्तवः ॥ दत्तानि सर्व
दानानि सुराः सर्वे समर्चिताः ॥१४१॥ इह लोके परे वा
पि न भयं विद्यते क्वचित् ॥ नाम्नां सहस्रं योधीते
द्वादश्यां मम संनिधौ ॥१४२॥ स निर्दहति पापानि कल्प
कोटिशतानि च ॥ अश्वत्थसन्निधौ पार्थ ध्यात्वा मनसि
केशवं ॥१४३॥ पठेन्नाम सहस्रं तु गवां कोटिफलं ल ६९
भेत् ॥ शिवालये पठेन्नित्यं तुलसीवनसंस्थितः ॥१४४॥

137

नरा मुक्तिमवाप्नोति चक्रपाणेर्वचो यथा ॥ ब्रह्महत्यादि
कं पापं सर्वं पापं विनश्यति ॥ १४५ ॥ ब्रह्महत्यादिपापानि का
मकर्मकृतानि च ॥ विलयं यांति सर्वाणि अन्यपापस्य का क
था ॥ १४६ ॥ इति श्रीमन्महाभारते शतसहस्रसंहितायां वै
यासिक्यां शांतिपर्वणि उममानुशासने दानधर्मोत्तमे
श्रीविष्णोर्दिव्यसहस्रनामसंपूर्णम् ॥ ॥ प्रमादात्कुर्वतां
कर्मप्रच्यवसध्वरेतु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णं
स्यादिति स्मृतिः ॥ १ ॥ सहस्रनामसंबंधव्याख्या सर्वेसु
खावहा ॥ श्रुतिस्मृतिन्यायमूला रचिता हरिपादयोः ॥
इति श्रीपरमहंसपरिव्राजकाचार्य श्रीशंकराचार्यवि
रचितं श्रीविष्णुसहस्रनामभाष्यं समाप्तम् ॥ संवत् १८
८३ शाके १७४८ व्ययनाम्नाब्दे पौषवद्यद्वादश्यां बुधवारे
इदं पुस्तकं लिखितं कृविमडोपनामकजयकृष्णशर्मणा ॥ ६५

७०

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया॥ यदि शुद्धमशुद्धं वा मम दोषो न विद्यते॥

५१

KKSU LIBRARY
RAMTEK
441 106
M-1553
Dist Nagpur

```
[OrderDescription]
,CREATED=28.08.20 11:15
,TRANSFERRED=2020/08/28 at 15:39:56
,PAGES=139
,TYPE=STD
,NAME=S0003559
,Book Name=M-1553-VISHNUSAHASRANAM BHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
```

```
FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
```

```
FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,
```